नं० ७८८-घ
रघुवंश टीका
शिशुहितैषिणी
पत्राणि ४६

रघुवंश४सर्गटीका.प.८

१ ५

राज्ञां ४

॥श्रीगणेशाय नमः॥ स इति १ स रघुः गुरुणा पित्रा दत्तं राज्यं प्रतिपद्य प्राप्य अधिकं बभौ रेजे कइव दिनान्ते सायं सवित्रा सूर्येण नि
हितं दीप्तं तेजः प्राप्य हुताशनोऽग्निरिव अग्निं चादित्यः प्रविशतीति श्रुतिः २ न्यस्तेति न्यस्तं त्यक्तं शस्त्रमायुधं येन तं दिलीपं तं च र
घुं श्रुत्वा राजानः शत्रुभूपाः राज्ञोऽस्य मेषान्न प्राणां उद्धृतो उत्खातो नाराचो लोहबाणो यस्मात् तस्मिन् हृदि शल्यमिव [illegible] मल्लमिवा
र्पितं दिलीपः शस्त्रमत्याक्षीदिति पूर्वं श्रुत्वा हृदये उत्खातनाराच इव महानंदः समजनि तदनु रघु राजानो श्रुत्वा यथा क
स्मिन् हृदये शल्यमर्पयितं तथा कष्टमजनि इष्टस्यार्थः सुश्रुत्वा मिति लोवायी सद्वस्तु इत्याकं सः २ दिलीपेति दिलीपानंत
रं राज्ये प्रतिष्ठितं कृतास्पदं तं रघुं निशम्य श्रुत्वा पूर्वं प्रधूमिते संतप्ते हृदि अग्निरिवोत्थितः सधर्मे गुत्थानं स्थितानामित्याध्मा
हाराद्येककर्तृकालान्न वेहि अन्यथा श्रो तान्प्रः उत्थितोऽग्निरिति संघटते रात्रिरव्यात् ३ पुरुहूतेति नवं नूतनं तनयं दृष्ट्वा त्यानेम
भ्युदयं तद्धर्मिनः तस्य रघोः सुहुशोभमानाः प्रजाः संतानेयासोतोः सुप्रजाः अजोः प्र कृतयोनंदेः समष्टिं शासुः तस्य केसव पुरुहू
तध्वजो नाम कश्चिद्राजा इज्यः इद्रकेतुस्तस्येव उन्नतेनेव त्वं क्रययो यासोतोः द्वयोस्त्त्वं उक्तं च प्रजामेधयोरित्यासिच्यत
यः ४ द्वयमिति द्विरदो यस्या सो द्विरदस्तेन गंतुं शीलमस्य सः यद्वा द्विरदवज्जच्छ[illegible]तिउपमाने णिनिः एता दृशेन तेन रघु
णा द्वयं समं एककैदैव समाक्रांतं किं तद्द्वयं पैत्र्यं जनकसंबंधि सिंहासनं अ[illegible] खिलं समस्तमरिमंडलं च अभिषिक्तो राजा हि
स्तिनमारुह्य पुरे भ्रमतीति वृद्धाचारः ५ छायेति किलेत्यागमे अन्वहं स्याडंबुमशक्या पद्मालक्ष्मीः छायामंडलं कांतिसमू
हस्तेन लक्ष्येनानुमीयमानेन पद्ममेवातपत्रं छत्रं तेन साम्राज्यभावः साम्राज्यं तेन दीप्तिं धृतवतं भेजे अभिषेके प्राप्य स्नातप
त्रेण साम्राज्यं सेवते इत्यागमः तत्र द्युतिभरविशेषा छाया आतपाभावो पत्रैव छत्रं तत्रैवं भावः संभवति अतः छायासमूहेन छ
त्रमनुमितमतः तल्लक्ष्म्याः सेवनमपीति विरतार्थः छायास्त्र्याः सूर्यप्रियाकांतिरित्यमरः लक्ष्मीः पद्मालया पद्मेति कोशः ६
परिकल्पितमिति काले काले प्रस्तावसरे वंदिषु वैतालिकेषु परिकल्पितं धृते सान्निध्यं अधिष्ठानं यया सा सरस्वती स्तुतं

स्तुतियोग्यंपं तरघुंअप्सरोभिरर्थसहिताभिः स्तुतिभिरुपतस्थे भेजे चकारः पूर्वसमुच्चयार्थः नकेवलं लक्ष्मीर्भेजे वागपीत्यर्थः अ-
त्रापि वाणीभिर्भारत्याः सेवनमनुमितं ७ मन्विति मनुप्रादिर्येषां ते मन्वादयस्तैर्मनुप्रभृतिभिर्मान्यैः पूज्यैः राजभिर्यद्यपीयं मे-
दनीपूर्वोपभुक्ता तथापितस्मिन्रघौ नास्त्यन्यः पूर्वोयस्याः सा तथैवासीत् अपूर्वमेव भर्त्तरि रघावनुरक्ता भोगानुशयं चकारे-
त्यर्थः याभुक्ता सा सा कथमनन्यपूर्वेति विरोधाभासः अत्र वसुंधरेतिसंज्ञायामप्रभृति [illegible] इति सदिधारिम्प इति ख च एत-
राज्यं प्राप्य पूर्वेषां विस्मरणादनन्यपूर्वे तु तेषां ८ स हीति अनन्यपूर्वत्वहेतुमाह सरघुर्लोकस्य मनः आददे वशीचक्रे कया
यस्य याद्दण्डुचितो तस्य तादण्डुचितो दंडस्तस्य भावस्तया कः इव नातिशीतो नात्युष्णो दक्षिणो नभस्वानिव वायुरिव मलयानि-
लोपि सर्वेषां मनो गृह्णाति उद्वेजयति तीक्ष्णो नमृदुनापरिभूयते दंडेन नृपतिस्तस्माद्युक्तदंडः प्रशस्यते इति शास्त्रोक्तत्वा-
त् ९ काममिति कामं यद्यपि रघोर्नेत्रे कमलपत्राणामनुकारिणी सदृशे एव नेत्रे ते तथापि शास्त्रीति शास्त्रेते न चक्षुष्मतानेत्र-
त्वमभूत् कीदृशस्य सूक्ष्मं दुर्विज्ञेयं कार्यमर्थादिदृष्टं शीलमस्य तस्य आकर्णीयत नेत्रे पि शास्त्रे कारणमभूत् इत्यर्थः
अकामानुमतो कामं १० यथेति यथा प्रह्लादनात्सुखकारित्वाच्चंद्रः चदि आह्लादे इस्माद्दौणादिकोरक्प्रत्ययः यथा प्रता-
पात्संतापकारित्वात्तपनः सूर्यः तप संतापे इत्यस्माल्ल्युट् तथैव सरघुः प्र[illegible]तेः प्रजाया रंजनादनुरागकरणाद[illegible]न्वर्थोभूत्
अनुगतोर्थो यत्र सः अर्थमनुगतोन्वर्थ इति कैयटः स्वाम्यमात्यजनदुर्गकोशदंडराष्ट्राणि प्रकृतयः इति कोषः ल्यानतुकर्ण-
रंजनादिति यावता रजकरजनरजः सु यं संख्यानमितिपनेनातुनास्ति कलोपेनभावी अत्रोच्यते रुचेयादिजनरजः नशा दस्यो-
णादिकस्य तस्यातनग्रहणमत्र तु रंजनशब्दो ल्युट्प्रत्ययोन्तो न दोषः अथवा रंजनाद्राजा पौराणिकी अद्यतनानां सुराज्ञदीन्ता
वितस्य च्युतिप्रपन्नाः ११ नयविद्भिरिति नयं न्यायं विदंतीति नयविदो नीतिज्ञास्तैः सचिवैः नवे तस्मिन्संक्षोभनं कर्मअस

च्यो शोभनं कर्म दर्शितं बभूव तस्मिन् रघौ राजनि सर्व एव पक्षः सर्वः शोभन एवाभवत् उत्तरोऽस्य सन्नोन यद्यपि सर्वशब्दः प्रथम
निर्दिष्ट आसन् च शशिप्रभृतयः तथापि प्रतिनिर्दिष्टः प्रत्याहृतः कृत्वा प्रतिपादनार्थ उक्ति सुक्तः १२ दमेति तेन राज्ञा गुणाः औदार्यस्थैर्य
शौर्यप्रभावादयस्ते षामाधिक्येन गुरोर्दिलीपस्य जाः संदेहं कृतं गताः मंदप्रीत यः कृतः के न कस्मिन्निव सहकारस्याम्रस्य फलेन पुष्पोद्
गमश्च बलोकान्तनेन च सूत फलं प्राप्य प्रा[illegible] गमः तं पुष्पोद्गमं न स्मरंति यथा तथा सहकारशब्दस्य काकगोलकन्यायेनोभयत्रापि अन्व
यः उद्गमपदं तत्प्रमाकार्यार्थं उत्कंगतं स्मरणमिति कश्चित् १३ पंचानामिति तेन वे तस्मिन् महीपाले राजनि पंचानामपि भूतानां प्र
प्यप्तेजोवाय्वाकाशानां गुणाः रूपरसगंधस्पर्शशब्दाः उत्कर्षं पुपुषुः उत्कृष्टाः जाताः अतः सर्वमधिकमिवाभवदित्युक्ते[illegible]ता १४
लब्धेति अथानंतरं एनं रघुं पंकजसलक्षणं चिह्नं यस्याः सा शरत् द्वितीया अन्या पार्थिवस्य राज्यलक्ष्मीरिव समुपस्थिता समाग
ता कीदृशमेनं लब्धप्रशमनेन स्व... स्य मनाकुले शत्रुमित्रभूपानां मतिप्रत्यभूमिपतीनां अनुरंजनप्रतिकाराभ्यां प्रशमनं यस्मिन् तत्प्र
शमनेराज्यमित्युच्यते प्राप्तराज्येनाकुलमित्यर्थः अथवा पौरजनपुरोधानामनुग्रहः गुप्तिः रक्षा यत्नालस्यां तुलाभारमाउप्ता
द्भिः अर्थिभ्यः व स्थापने सम्पत्केन दृद्धिः सत्कारणं तु लुब्धप्रशमनमिति कश्चित् १५ इतः शरद्वर्णेन निर्दिष्टेति रघोः प्रतापः कोश
दंडजं तेजः सूर्यस्य च प्रतापो घर्मः युगपत्समकालं दिशो व्यानशे व्याप्तवान् कीदृशः दृष्टेरभावो निर्दृष्टिः अव्ययीविभक्त्यादिना स
मासः तेन लघुभिर्मेघैर्मुक्तं सत्कं वर्त्म मार्गो यस्य सः अतएव दुःसहः वर्षासु घनरोधात् आनशे इति अस्नाते परोद्वेलिट् १६ अधि
ज्यमिति वर्षांते शाक्रं धनुः सेजहार संहृतवान् १७ पुंडरीकेति रुतुः शरत् रघुं विडंबयामास अनुकारं चकार पुनः तच्छ्रियं तस्य
रघोः श्रियं शोभां नाप अनुकरणमेवाह पुंडरीकं सितकमलमेव आतपत्रं छत्रं यत्र विलसंतः काशा एव चामराणि यत्र ता दृशः पुं
डरीकं सितं भोजमिति हैमकोषः राजा प्येवं भूत इति १८ प्रसादेति तदा शरदि प्रसादेन मनोहरं मुखं यस्य सः तस्मिन् रूपे विशदा

व्यक्तात्रभाक्रांतिर्यस्य सः तादृशो चंद्रे च च दुष्मंतो सहृदयां प्रीतिं दध्योः समस्तकल्पा रसोद्भवो यस्या स्तादृशी आसीत् समानप्रतिप
त्तिजाते त्यर्थः गुणेरागे द्वेरसद्दत्समरः प्रसादस्तुप्रसन्नते त्समरः १९ हंसेति तदीयानां रघुसंबंधिनां यशसां विभ्रतयो संपदः हंस
श्रेणीषु तारासु नत्तत्रेषु च कुमुदानिसंसेषु वारिषु पानीयेषु पर्यस्ता इव विक्षिप्ता इव आसन् २० इक्षुच्छायेति शालिगोप्यो धान्यर
क्षिकाः तस्य गोप्तुः रत्तकस्य रघोर्गुणानां सौंदर्यादीनां उदय प्रकाशो यत्र तदेवं यथा स्यात्तथा यशो जगुर्गायेतिस्म कीदृश्यः इक्षुणां
छायासु निषादिन्यः उपविष्टाः कीदृशं यशः कुमारकथा मर्यादीकृत्य उद्भूतः आरंभो यस्य तत् उद्भूत आरंभः इत्यमरः २१ प्रस
सादेति कुंभयोनेरगस्त्यस्य प्रादयादंभः प्रससा[illegible]द निर्मलमभूत् रघोरुदयात्तु [illegible] मनः शंकि पराभवेशंकमानं द्विषतां शत्रूणां
मनः चुक्षुभे क्षुभितं महौजस इति मुनिरघोः साम्यं चुक्षुभे इति स्वरितेत् २२ मदेति शरदि वृषाणां जातिस्म हांतश्रेष्ठानां द
र्पिष्ठा वलीवर्दाः लीलया खेलं निरायासेन स्खलरं तादृशं रघोर्विक्रमं अनुप्रापुः अनुपपुः कीदृशाः मदेन हर्षेण उद्दग्रा उत्कटाः
ककु[illegible]द्लीवर्द्दाः संगभेदः तद्युक्ताः सरितां नदीनां कूलं तटमुद्रुजंतीति भजंतीति कूलमुद्रुजाः वृषभाणां खेलालीला क्रीडया
भूतं विक्रमं गमनविशेषमित्यर्थः नृपविक्रमोपि मदोदग्रः क[illegible]कुद्मान् जलक्षणेन सहितः प्रयाणयात्रायां हस्त्यश्वादिखुराद्यभि
घातेन नदीनां तटभेत्ता भवति खेलेति खेलृ चलने इत्यस्य प्रयोगः महोक्षेति अत्र चतुरेत्यादिना ऽत्रसयोः तो निपातितः कूलमुद्रु
जा इति उदिकूलेरुजिवहोरिति खश्मुमागमश्च श्रेष्ठे ... राजांके ककुद्मीति कोषात् क्रीडा खेला च कूर्दनमित्यमरः २३
प्रसवैरिति तेसा रघोः नागा हस्तिनः अस्य ययेव व्यये व सप्तधा सप्तभिः प्रकारैः प्रशुश्रुवुः प्राश्रवन् कीदृशाः सप्तपर्णानां वृक्षवि
शेषाणां प्रसवैः पुष्पैः राहतास्ताडिताः कीदृशैर्मदगंधिभिः मदवद्गंधो येषां तैः इव शब्द एवार्थे अन्यथा सप्तधा त्वरणं गजानाम चिरं
जीवित्वस्य च कं दुष्टत्वस्यात् करात् करांभ्यां मेढ्राभ्यां नेत्राभ्यां च मदस्रुतिरिति पा लकः सप्तधेति संख्याया विधार्थे धा २४ सरि
त इति शरद् वर्षा सयः शक्तेः प्रथममाद्यं तेरघुं प्रेरयामास प्रेरयति स्म किंभूता शरत् सरितो नदीः गाधाः स्वल्पजलाः कुर्वती पथो
मार्गात् ईषच्छुष्कः कर्दमो येषां तादृशान् कुर्वती प्रस्थेयायात्रायै २५ तस्मा इति वाजिग्रहणं हस्त्युपलक्षणं वाजिनां नीराजन

विधिः शांतिकरणं तत्र सम्यग्हुतो वह्निरग्निः प्रदक्षिणार्चिर्व्याजेन प्रदक्षिणाकारज्वालामिषेण हस्तेनेव तस्मै रघवे जयं ददौ ददा
तिस्म उक्तं च बृहद्दशपामहर्षम्पोकार्त्तिकशुक्ले पंचदश्यां वा अश्वगजस्य हि कुर्यान्नीराजसंज्ञितां शांतिमिति २६ स इति स रघुः दि
ग्जिगीषया दिशां जेतुमिच्छया षड्विधं षट्प्रकारं बलमादाय गृहीत्वा प्रतस्थे प्रस्थाने चक्रे कीदृशः गुप्तमूलं निजनिवासपुरी प
र्यंतो निकटदेशः अश्रयेन सः शुद्धेगत वैरः पार्ष्णिः पृष्ठिप्रतिभूतो यस्य सः अयेन शुभावहविधिनाऽन्वितो युक्तः षड्विधं बलं य
थामौलं भृतकं सुहृच्छ्रेणीद्विषदाटविकं बलमिति कामंदकात् तत्र मौलं क्रमागतं भृतकं मनधार्य मानं मित्रं प्रसिद्धं अमित्रं कारा
दृशीकृतं आटविकं कार्याद्दृशीकृतं कार्यवशाद्स्थिरमागतं हस्त्यश्वरथपदातिनाविकाटविकाश्चेति केचित् तत्पाठो कुर्वे वा
नम्यार्च्यविशेषः श्रमुखं श्वशुभवासरे॥ षड्विधं तु बलं मूलं द्विषतो मित्रमुखं व्रजेदिति जिगीषयेति शक्तिरेजेरितिजेगीषादेशः अ
अवेति वयोवृद्धा जरत्यः पौरस्त्रियः पुरवासिन्यो नार्यो लाजैस्तं रघुमवाकिरन् इति यात्राकालस्याचारः काः कैः कमिव मंद
रोद्धूतैर्मंदराचलभ्रमणोत्थितैः पृषतैर्विंदुभिः क्षीरोर्मयः क्षीरसमुद्रतरंगाः अच्युतं कृष्णमिव क्षीरस[illegible] दादिपि समुद्रश्रीतिः
मंदरपर्वतग्रहणसामर्थ्यात् ऊर्मिर्वीचिः स्त्रियामित्यमरसिंहोक्तत्वान्नोपमावैषम्यं प्रययाविति रजोभिरिति युग्मं प्राचीनबर्हिषा
इंद्रेण तुल्यः समानः स रघुः रथमंप्राचीं पूर्वां दिशं प्रययौ गतः किं कुर्वन् अनिलोद्धतैः समीरकंपितैः केतुभिर्ध्वजैः अहितान्
शत्रून् तर्जयन्निव अग्रेभ्यः अंगुल्यादिना तर्जयंति प्राचीनबर्हिर्दिवस्पतिरिति वैजयंती २८ पुनः किं कुर्वन् ययौ स्यंदनोद्धूते
रथाद्युत्थितैः रजोभिर्धूलिभिर्भूतलमिव ध्वस्त व्योमाकाशं कुर्वन् घनसन्निभैर्मेघतुल्यैर्गजैश्च नीलभूतलं व्योमाकाश
मिव कुर्वन् लक्षणे हेतोः क्रियाया इति शतृ च ३० पुरस्कृति तस्य रघोः पुरोगैः [illegible] ग्रेगामिभिर्मार्गे निम्नगा नद्यः स्नानादिना
कलुषा मलिना श्चक्रिरे कृताः सहैः पश्चाद्यायिभिः सहगामिभिः कृषाः अल्पोदकाः पश्चात् अयायिभिः व्रजद्भिः पंकाः कर्दमशे
षाः दीपकोपमालंकारः इति सैन्यसहोक्तिः ३१ मरुत्पृष्ठेति स रघुः मरुत्पृष्ठानि निर्जलदेशस्थानानि शक्तिमत्त्वाद तिरवन

गहनं काननं र

नद्याः पारेण उदंभांसि उद्गतनीराणि चकार नावातीर्येति तितीर्षाः नदीः सेतुबंधादिना सुप्रतराः गोष्पदतुल्याः अयमपि तद्दीप
कः समानो मरुधन्वानो अटव्यरण्यं विपिनं वनमित्यमरः स इति ३२ स रघुः गंगां भगीरथ इव सेनां कर्षन् प्रभाववशो भवति महतीं
पूर्वसागरगामिनीमिति विशेषणद्वयं गंगायाः सेनायाश्च तुल्यं हरजटाभ्रष्टां पतितामिति गंगायाः एव ३३ प्रताप इति अग्रेतत्र
तापः ततः शब्दः सैन्यकलकलः तदनंतरं पुरोगाः अग्रेसराः पश्चात् षडंगानीकं चतुरंगसैन्यं सा चमूः चत्वारः स्कंधाः व्यूहा यस्याः
सा नादृशी ययौ जगाम सप्रतापः प्रभावश्च यत्तेजः कोशदंडजमित्यमरः चतुःस्कंधेति तद्रूपधर्मेति पतंग ३४ आत्मा जितैरिति त
स्य रघोः न्यपे मार्गः उल्वणः स्फुटः आसीत् जनिकीदृशैः फलैः धनं धान्यं वा ताजितैः यथा तादृशैः पादपैः तरुभिर्दृतिनो गज
स्य मार्गः प्रकटः स्यात् उल्वणं विशदं स्फुटमिति यादवः फले फलेधने बीजे निष्पत्तौ शस्यभालयोरिति केशवः गतिबुद्ध्यादि
ना द्विकर्मकत्वे फलैः ताजितैरिति अकथितं चेति चकारादिति केचित् ३५ पौरस्त्यानिति जयी जयवान् स रघुः पौलस्त्यानेव पु
रोभवान् पौरस्त्यान् तान् पश्चिमपश्चात्पुरस्तात् जनपदान् देशान् आक्रामन् तालीवनेन श्यामं महोदधेः समुद्रस्योपकंठं तत्
टं प्रापज्जयीति जिष्णुः विसर्गात् ३६ अनम्राणामिति सिंधुरया नदीवेगादिवानम्राणां स्तब्धानां समुद्धर्तुरुत्खातुस्तस्मा
द्रघोः सकाशात् सुह्मैः सुह्मदेशसंबंधिभिः राजभिर्वैतसीवृत्तसंबंधिनीं नम्रतारूपां वृत्तिमाश्रित्याधिष्ठाय आत्मा संरक्षितः य
थोत्कटो नदीवेगो नम्रतायतं वेतसं नोत्खातयति तथायमपि नम्रान्सुह्मान्नोत्सारितवान् इत्यर्थः सुह्मशब्दो देहश्चरणत
द्राजस्येति सुह्मा एव वंगात् ३७ वंगानिति नेता सन्नपस्तरसा बलेन नौसाधनोद्यतान् नौरूपं साधनमुपायस्तत्रोद्यमान्
वंगान् वंगदेशीयान् उत्खायोन्मूल्य गंगास्रोतोंतरेषु प्रवाहमध्येषु जयस्तंभान् चकार शाकपार्थिवादित्वात् समासः निचखान
रोपितवान् तरसा बलं रंहसी इति ३८ आपादेति एवमुत्खाताः पश्चात्प्ररोपिताः अत एव पादयोः प्रणताः वंगाराजा
नस्तं रघुं फलैर्नैः रवर्द्धयन् कलमा इव यथा कलमाः शालिविशेषाः उत्खातप्रतिरोपिताः स्वेत्रे पद्मस्यापि संभवात्ताद

मूलेयत्तस्यैतदवधिमंजरीभारेणनम्राबहुफलेतितथेत्यर्थः तदुक्तंभारविणा ततोवपश्चात्कलमस्पसोधिकंसवारिजेवारि
णिमूलीयकमिति ३९ सतीत्वेंति सरघुर्वङ्गराजाएवसेतवोयैस्तैः करणभूतैः सैन्यैः कपिशाभिधानांनदीतीर्त्वाउत्कलदे
शोद्भवैराजभिः दर्शितःपंथायस्यसःतादृशाःकलिंगदेशाभिमुखंययौजगामउत्कलदेशीयाः संग्रामंविनैवरघुचरणयोर्न्निप
तन्नित्यर्थः पथइतिकुकुरेत्यादिनात्सत्ययः॥४०॥ सइति सरघुर्महेंद्रस्योत्कलदेशाधिपस्यमूर्द्ध्नि [illegible] तीक्ष्णंतीव्रंप्रतापंस्वंवे
ग्रायतंस्थापितवान् यंताहस्तिपकोगंभीरवेदिनःस्फीणमवगाणयतोगजस्पशीर्षेअंकुशमिवसंज्ञानलभतेयस्तुविंद्याद्गंभीरवे
दिनमितिवालकाव्यः यंताहस्तिपकेसूतेइत्यनेकार्थः॥४१॥ प्रतीति कालिंगःकलिंगदेशीराजागजाःसाधनंसेनांगयस्पतादृशो योद्ध
महेन्द्रस्यवधेस्तरघुप्रतिजग्राहप्रतीच्छतिस्मशस्त्रैःरघुणासहयुयुधेइत्यर्थः कःकमिवपक्षाणांछेदनेखड्गनेउद्यतमुद्य
तंशक्तंयेनंतंइंद्रं शिलावर्षीपर्वतइव॥४२॥ द्विषामिति तत्रकलिंगदेशेककुत्स्थवंशेभवःकाकुत्स्थोरघुर्द्वि
षामरीणांनाराचाः लोहबाणास्तेषांदुर्द्दिनंदृष्टिविपद्यवाप्यत्वासन्मंगलस्नातःसर्वौषधिभिर्विहितस्नानइव
जयश्रियेजयलक्ष्मीप्रपेदेप्रापवैरिबाणदृष्टिसहनानंतरंनृपोराजाजयश्रिष्टस्तर्थः यद्यपिदुर्दिनमेघछन्नेदृष्टे
त्रिमुखार्थस्तथापिलक्षणयाद्रष्टुर्ध्याववगंतव्यः उक्तंच यत्तुसर्वौषधिस्नानेनमंगलस्य मलोदकमितिवैजयं
तीअंगस्नानकथनेनसंग्रामसहनस्यव्याप्तिनिर्मोकित्वसूचनंउप्यादिनंदत्रेजटामांस्यादिनामंगलस्नानेन
नजयसिद्धिरितिसकेवारग्रहणार्थेस्नानंचेतसके ४३ वायवेति वायुर्देवताअस्पेतिवायव्यंसोमादेवतेतियत्प्रत
यःतेनास्त्रेणविनिर्द्दताद्धिदितागजर्जनीकाद्धस्तिसैन्यात्सरघुःकालिंगःराजानंप्रतिजग्राहगृहीतवान् यथाप
ताम्पांगवाविद्वानहिमान्महोदधेःसमुद्रांनात्ताचोद्दीगरुडःसर्पमिव ४४ तानूलीति तत्रकलिंगदेशेतांबूलीनां

नागवल्लीनां दलैः रचितां कल्पितां यां पानभूमयो वैस्तेयो धामयानालिकेराज्जातं ग्रासवं शत्रोरिदं शात्रवं यशः एव वकोर्थः
इव पपुः पिवंतिस्म तद्देशोचितपानोक्तिः तांबूलवल्लीतां बूली स्मरः ॥४५॥ गृहीतेति ॥ धर्मेण विजयी धर्मविजयी स रघुर्म
गधेश्वरस्य श्रियं लक्ष्मीं जहार हृतवान् न तु मेदिनीं कारणार्थं कृतो दिग्विजयो न स रघुः एवं गृहीतः पश्चात्प्रतिमुक्तो
यस्तस्य महेंद्रदेशाधीश्वरस्य श्रियं शोभां जहार हृतवान् न तु मेदिनीं मेदः संबंधाद्दोर्गध्येन घृणा यास्त्यागहेतुस्स्मृते
॥४६॥ ततइति ॥ ततोनंतरं स रघुः फलवतां क्रमुकानां क्रमुकतरूणां मालाः सास्तीति फलवत्क्रममालिना वेलातटेनैव
सागरतटपथेन वागस्त्यनमुनिना चरितां ध्युषितां आशां तां दक्षिणां दिशं ययौ गतः कीदृशः अनाशास्योन्यैर्दुरधि
गम्यो जयो यस्य सः ननु कथमनाशास्येति एतिस्तुत्वा खीतिक्विप्रत्यये शासु इदनूहस्येरिती त्वप्रसंगात् अत्रोच्यते [illegible]
[illegible]शासनं शासः तत्र स्तुतत्वरोतीति णिच् अथवा शासु हिंसायाम् इत्यर्थः इति चुरादिपाठे णिच् वेस्मात टेनेति स्याहस्मा
दित्वात् तृतीया एवकारः कविनमार्गो प्रतिहतस्त्वचनार्थः फलयुक्तान् क्रमुकान् मालयतीति णिनि मोलाशब्दः क्रादित्वादि
तीन अगस्त्योदक्षिणामाशामाश्रित्य वसति स्थित इति पुराणे ॥४७॥ स सैन्येति ॥ स रघुः गजानां दानं मदोदकं तेन सुगं
धिना सैन्यस्य परिभोगो जलक्रीडानादस्तेन कावेरीनदीसरितां नदीनां पत्युः समुद्रस्य शंकिनीयां शंक्यामिवाकरोत् तस्य
या परपुरपभुक्ताया भित्तं सागरागादिना भर्तुः शंक्या भवतीति सरिदुक्तिः पतुरिति कृद्योगे षष्ठी ॥४८॥ भयेति ॥ ते
न रघुणा भयात् उत्सृष्टात् त्यक्ता विभूषा यैस्तेन कारण्या भित्तास्ताः सांकेरलयोषितां केरलदेशसंबंधिनीनां स्त्रीणामल
केषु चूर्णकुंतलेषु चमूरेणुर्बलरजः [illegible] प्रतिनिधीकृतः कर्पूरचंदनचूर्णस्थानीयः संपादित इत्यर्थः ॥४९॥ बलैरि
ति ॥ गताध्वनः प्रोल्लंघितमार्गस्य विजिगीषोर्विशेषेण जेतुमिच्छोः तस्य रघोः बलैः सैन्यैर्मलयामेलयाचलसोप
त्यकाः आसन्नमुबोध्युषिताः अधिष्ठिताः कीदृशः शरीतेः पतिविशेषैरु[illegible] पतिताः मारीचायासुक्ताः लावङ्ग

वच्चहारीतजीवंजीवादयोपि चेति वैजयंती उपाधिभ्यां स्वकचूतन्दे राजाति रुक्तो॥५०॥ससंजुरिति॥ अश्वैः क्षुण्णानां चरणैर्नित
नामेलावल्लीनामूर्द्धउत्पन्नशीलाः फलानां बीजानां धूलयो मत्तानामिभानां करिणां कटेषु कुंभस्थलेषु ससंजुः संगता
अभवन् कीदृशः तुल्यगंधाः येषां तेषु॥५१॥ आजानेयेति॥ आजानेयानां कुलीनानामश्वानां खुरैः क्षुण्णं मर्दितं यत्तत्प
कैलानां स्तेनं तत्र संभवमुत्पन्नं कीटकोशपदाविलं मलिनं रजः सपदि व्योमाकाशं व्यानशे व्याप्नोतिस्मेति॥ स्तेपायं आ
जानेयः कुलीनोश्व इति हेमकोशः॥५२॥ भोगीति॥ चंदनद्रुमाणां भोगिभिः सर्पैर्वेष्टनमार्गेषु समर्पितं निश्चितं त्रिप
दी चरणबंधनं तत्रोट्ठनसमर्थानामपि करिणां गजानां ग्रैवेयी वा बंधनं रज्वादि न सस्त्रेन चचाल न तु सस्त्रस्त्याल
नेपदं नगतिहिंसार्थेभ्यः इति निषेधान्नात्र कर्मव्यतिहारे परस्मैपदं संभवते यद्वा कर्मकर्त्तरि रूपं नातस्त्रेसात्करिणां
ग्रैवमितिडुग्रोलुनीतिस्त्रसतेरढू ग्रैवमिति ग्रीवाभ्यश्चेत्यण्प्रत्ययः अस्मिन्प्रयोगे तत्रै ग्रैवस्य समर्पणेनोचितमिति
अतोनोलानं करिणां सस्त्रं इति पाठे युक्तः॥५३॥ दिशीति॥ दक्षिणस्यां दिशि रवेरपि सूर्यस्यापि तेजो मंदायते हीनं स्या
त्॥ तस्यामेव दिशि पांड्याः रघोः प्रतापं न सेहिरे न सहंते स्म न तु पांड्याः मितिकथयंतो हृद्धेत्कोशलेत्यादिना जनपद शब्दा
त्वीडोर्पणेनस्पतडग्राद्वस्य बहुष्विति लुक् तत्र पांड इति भाव्यं अत्रोच्यते पांडोराजनि साधव इति तन्त्रे स्याधुरिति यः अ
तो तुल्लुक्रमायं पांड्या नितस्य विषयः किंत्वतएव पांडरस वशात्र लुक्षपितुल्यमित्येके॥५४॥ ताम्रेति॥ ते पांड्याराजान
स्ताम्रपर्णी नाम्नी नदी तया समेतस्य संगतस्य महोदधेः समुद्रस्य मुक्तासारं मौक्तिकानां सारं तस्मै रघवे निपत्यनम
स्कृताः दर्दुरवंतः ताम्रपर्णी समुद्रस्य संयोगे मौक्तिकानामुत्पत्तिरिति लोकप्रसिद्धः॥५५॥ स निर्विश्येति॥ अस स्येति॥
युग्मं॥ स रघुः सह्यं नाम नगं गिरिं अलंघयत किं कृत्वा तटे साधीना श्वादनंतरं वो यो स्तोमलयदर्दुराख्यो शैलो पर्वतीय

याकामंस्वेच्छयानिर्विशेषोपभुज्यएतौकाविवतस्मादिग्भ्यःअंदनलिनैःस्तनाविवकीदृशोरघुःसोढुमशक्योऽसह्योवि
क्रमोयस्यसःकीदृशंसत्वंउदन्वतासमुद्रेणदूरमुक्तंसैकंसलंसकमिवसत्वस्तविगलितमंशुकवस्त्रंयस्यास्तादृशंमेदिन्या
भूमेर्नितंबंश्रोणितटमिवदूरत्यक्तमितिसूक्तोंशुकसाम्यार्थंत्यागस्तुपरसुरामोत्सारितत्वेनअन्योपियोषितःस्तनौक्रमतः
स्पृष्ट्वामुक्तवसनंनितंबमाक्रमतीतिछायार्थः॥५३॥तस्येति॥तस्यरघोर्विसर्पिभिःप्रसरणशीलैरनीकैःसैन्यैःकृत्वारामेणउत्सा
रितोपिपरसुरामबाणापसर्पितोऽर्णवःसमुद्रःसह्यगिरौलग्नइवासीत्परसुरामःस्वस्यसमीपादर्णवंसमुत्सारितवानि
तिप्रसिद्धाकथाकीदृशैःअपरांताःपश्चात्यास्तेषांजयेउद्यतावुद्युक्तास्तैःअपरांतास्तुपाश्चात्याइत्यमरः॥५४॥मु
रलेति॥मुरलानामनदीतस्याःमारुतेनवायुनोद्धृतमुत्थापितंकेतकीनांसंबंधिरजःपरागस्तस्यरघोर्योधास्तेषांबाणवा
राःकवचानितेषांमयत्नपटवासतांनिरायाससुगंधिद्रव्यचूर्णभावमगमजतं॥पिष्टातःपटवासकइत्यमरःबाणवारस्तु
कंचुकइतिहेममाला॥५५॥खर्जूरीति॥खर्जूरीस्कंधेषुबद्धानांकरिणांगजानांमदोद्गारेणदानप्रसवेनसुगंधिषु
कटेषुकुंभस्थलेषुशिलीमुखाभ्रमराःपुन्नागेभ्योनागकेशरेभ्योनिपेतुःपतंतिस्मखर्जूरीचेतृणद्रुमाःपुन्नागःके
शरोशोकइत्यभिधानाच्चिंतामणिः॥५६॥अस्येति॥चरतांगच्छतांवाहानांतुरंगाणांगात्रेसिंजितैःगात्रेषुगमनवशा
दुद्भूतैःसिंजितैःग्रैवेयकादिभूषणशब्दैःमर्मरशब्दोमर्मरशब्दस्तुकारीपंचनेनोद्भूतंयदाजतालीवनेतस्यध्वनिरभ्यभूयतनि
राकृतः॥५७॥अवकाशमिति॥किलेतिपुराश्रूयतेअभ्यर्थितौउदन्वान्समुद्रोरामायजामदग्न्यायावकाशंददौइदा
नींतुअपरंन्यायनियश्चात्यानीभूपानीव्याजोत्कपराघवेकरंददतिस्म॥५८॥मत्तेभेति॥सरघुस्तत्रदेशेत्रिकूट
गिरिमुच्चैरुन्नतंजयस्तंभंचकेस्तंभमिवचकारकिंभूतंमत्तानामिभानांहस्तिनांरदनैर्दंतैरुत्कीर्णंव्यक्तंप्रकटंविक्रम

ले॰

याचितोर

लेदलेणैश्चिह्नितं यस्मिन्स तं ॥६०॥ पारसीकानिति ॥ ततोनंतरं पारसीकान्जेतुं स्थलवर्त्मना मार्गेण प्रतस्थे प्रस्थितः प्रह्लसा
दिव्यो तृतीया प्रतस्थ इति समवप्रोपविभ्यः स्थ इत्यात्मनेपदं संयमी योगीय द्वास्य वस्तुनः प्रमाणेण ११न्नं तत्त्वस्य तत्त्वेन द्विष
येन ज्ञानेन इंद्रियमित्याख्याभिधानं येषां तान्चतुरादीन् रिपून् निव ॥६१॥ यवनीति ॥ यवनानां स्त्रियो याजवन्यस्तासां मु
खान्येव पद्मानि तेषां मधुमदं मदिरापानजनितं मदं नीवतां न सेहे न चक्षमे क इव अकालजलदोदय इवासमयप्रादुर्भूतमे
घकालः ब्जानां नालातपप्रभातकालीनो यातपस्तमिव ॥६४॥ संग्राम इति ॥ अश्वसाधनं सामग्री येषां तैः पाश्चात्त्यैः पारसी
कैः सह तस्य रघोस्तुमुलः संकुलो भीषणो वा संग्रामो रणो भूत् अश्वाकुलत्वे कारणमाह । तुरगबाहुल्यादुत्थिते रजसि शार्ङ्गगा
णं विकारो शार्ङ्गो धनुस्तस्य शब्देन विज्ञेयाः प्रतियोधाः प्रतिपक्षभटा यत्र तादृशः तुमलं रणसंकुलमित्यमरः ॥६२॥ भल्ले
ति ॥ स रघुर्भल्लैरर्द्धचंद्रबाणैरपवर्जितैः छिन्नैस्तेषां यवनानां शिरोभिः मस्तकैः केश्मश्रुसहितैर्महीं तस्तार छादयत
त् शिरोभिः कैरिव सरघाभिर्मधुमक्षिकाभिर्व्याप्तैर्वेष्टितैः क्षौद्रपटलैरिव विस्तरः प्राच्छादने प्रयासाल्लिङ्गपाश्चा
त्याः श्मश्रूणि स्थापयित्वा केशान्वयंतीति देशाचारोक्तिः अतः श्मश्रुलैरित्युचितं विशेषणं सरघा मधुमक्षिके त्यमरः ॥६३॥
अपनीतेति ॥ अपनीतानि त्यक्तानि शिरस्त्राणानि मुकुटानि यैस्ते शेषास्ते पश्चात्तस्य रघुं शरणमीयुर्गताः शरणप्रवेशमात्रे
ण कथं जीवनमित्याह हि यतः महात्मनां महापुरुषाणां संरंभः क्रोधः प्रणिपातो नमस्कृतिरेव प्रतीकारः शांतिहेतुर्यस्य ता
दृशः महांतो हि नम्रत्वमात्रेण रोषं त्यजंतीति तात्पर्यार्थः ॥६४॥ विनयंतेति ॥ तस्य रघोर्योधाः आस्तीर्णानि अजिनरत्नानि उ
त्तमहरिणत्वचो यासु तथाभूतासु द्राक्षावल्लताभिर्वलयो वेष्टनं यासां तादृशासु भूमिषु मधुशिरासवपानैर्विजयोद्भूतं श्रमं
विनयंते स्म अपनिन्युः ॥६५॥ तत इति तदनंतरं रघुः कुबेरस्य यं कौबेरी तामुदीचीं दिशं प्रतस्थे प्रस्थानं चक्रे क इव रविरि
व किं कुर्वन् शरैः रुदीच्यान्राज्ञ उद्धरिष्यन् उन्मूलयिष्यन् शरैः करैरिव उस्त्रैर्मयूखैः रविः उदीच्यान् कोनि बरसानी

वजलानीव उदीच्यानिति दिगादित्वाद्यत् स्वशब्देन कलत्रं नदोषाय मिश्रप्रियथा वैलोक्तिपयेरेव बन्धित स्पस्वैरैरिवेति।
भानोरौपम्येन प्रचंडत्वोक्ता जिता निति अजय्योजेतुमशक्यो रघुः तानुदीच्यानेव नृपान् रघुपुरःसरान् स्पंदनाग्रगामिन
ह त्वोत्तरापथं प्रवेशाभाविशत् कः कमिव औवोग्निः वडवाग्निरर्णवं मिव स्यजय्योशक्यार्थे इति पातेः उत्तरादक्षिणाचेत्स
जेतमव्ययं स चासौ पंथाश्च कोपानि स्पमनिदेशिकमिति पुंल्लावो भावमाह देशस्ससंज्ञात्वात् निर्देश वस्त त्पः दक्षिणापथ
महासरं सीति जिनेंद्र बुद्धि प्रयोगः ऊर्ध्वर्बागिनि ह ष्टं ते नर घोछह्यत्व देशस्यमहत्वं च॥७०॥ विनीतेति। विनीतोगतोध्वश्र
मोमार्गक्लमो येषां तेतस्परघो र्वाजिनोश्वाः वंक्षुनामा काश्मीरो नदस्तत्तीरेया निर्विचेष्टितानितैर्लोटनादिभिर्लग्नाः
कुंकुमकेशराये षु ताहृशान्स्कंधान्दुधुवुः कंपयंतिस्म काश्मीरदेशेकुंकुमक्षेत्रवाहुल्यात्तत्र विचेष्टनेन लग्नकुंकु
मकेशरत्वं युक्तमिति॥७१॥ तत्रेति। तत्र देशे हूणानां तुरुष्कभेदानां तेषामवरोधाः स्त्रियः अवरोध शब्देन लक्षणया ... गिना
एवोच्यंते नासां कपोलयोः पाटनेन रवेर्विदलनं व्यादिशतीति ताहृशं रघुचेष्टितं वभूव किं विशिष्टं भर्तृ ... बुतनरपति बुहूणोबु
भक्तः प्रकटो विक्रमो यस्य तत्तथा हूनयोषितः कपोलविदारणपूर्वं रोरुदंतीति तद्देशाचारः॥७२॥ कांबोजाइति॥ कांबोजाः
कांबोजदेशजाताः भूपारणे तस्य रघोर्वीर्यं सोढुमनीश्वराः असमर्थाः गजानामालाने र्बहुबंधनैः परिक्लिष्टैः क्लेशमुपा
गतैरक्षोटैरक्षोटवृक्षैः सार्द्धं सह ... नम्राजाता इत्यर्थः अक्षोटकपर्वतालोद्भवित्यमरः सहोक्तिरलंकारः॥७३॥
तेषामिति॥ तेषां कांबोजराज्ञां सद्भिरश्वैरुत्तुंगाः प्रचुराः द्रविणराशयो हिरण्यकूटानि उपदादेकानिकोत्तकोशलेश्वरं
रघुं विविशुः प्रविशंतिस्म कीदृशानोत्सेकामहतांतश्समुद्रमिव निम्नगाः त्यपिपावः तत्रनबो ... मिव॥७४॥ ततइति। त
तोनंतरमश्वाः साधनं से नांगं यस्य सरघुः गोर्यो गुरुः पिता तं हिमाचलं गिरिमारुरोह आरुरुक्षुत किंकुर्वन्नुद्धूतैरश्वखु
रोत्थापितैर्धातुरेणुगैरिकाणि धूलिभिस्तत्कृतान् तस्य हिमाचलस्य शिखराणि वर्द्धयन्नुन्नतान्संदीपयन्नकूटोरस्त्रीत्वंसाध्यो॥७५॥

शशंसेति। प्रकरणात्तस्येत्यध्याहारः। स रघुस्तुल्यसत्त्वानामात्मसमानबलानां गुहाश्रयिणां कंदरास्थितानां सैन्यघोषके
पिकटककोलाहले सिंहसंनमधैर्येय यथास्यात्तथा परिव्याहृत्यालोकितस्तं शशंसा सत्त्वोपीत्। ७३। भूर्जेष्विति। मार्गे मरुतो वायव
स्तं रघुं सिषेविरे सेवयामासुः। कीदृशा मरुतः भूर्जद्रुमेषु मर्मरशब्दं प्राप्ताः कीचकानां सच्छिद्रवंशानां ध्वनेर्हेतवः गंगाशीक
रिणः गंगेषुकणवाहिनः सच्छिद्रकीचको वेणुरित्यमरः। भूर्येष्विति विशेषणेन सैवगंधत्वं कीचकध्वनीत्यनेन मांद्यं गंगाशीक
रिणत्वेन शैत्यं संगृहीतं। अप्येवं विधिः सेव्यते मर्मरो वल्कपर्णादेरित्यभिधानचिंतामणिः। ७४। सरलेति। आसन्नाः समीपवर्तिन्यः ओष
धयो नक्तं रात्रौ तस्य नेतुः नृपस्य अस्नेहास्तैलरहिता दीपिका आसन्। कीदृश्यः सरलद्रुमेषु देवदारुषु आसक्ता ये मातंगा गजास्ते
षां ग्रैवेयाणि ग्रीवालंकाराणि तत्र स्फुरिता त्विषो यासां ताः ग्रैवेयं कंठभूषेति हेमः ननु कुलकुक्षिग्रीवाभ्यश्चेति अनेनालं
कारेषु कप्रत्यये ग्रैवेयकमिति स्यात् ग्रीवाभ्योण्वेति चकारादिश्रत्यये ग्रैवेयमिति। ७५। विशेति। तस्य सैनिकाः सेनाचरा नमे
रूणां नागकेशरवृक्षाणां छायासु निषण्णानामुपविष्टानां मृगाणां नाभिभिः कस्तूरिकाभिर्वासिता सुगंधीकृता उत्संगा मध्या
नि यासां तथाभूता दृषदः शिला अध्यास्याधिष्ठाय विशश्रमुर्विश्रांताः। ७६। तस्येति। तस्य रघोः उत्सृष्टास्त्यक्ता ये निवासाः स्था
नानि तेषु कंठरज्जुभिः क्षतास्त्वचो येषां ते देवदारवः सरलवृक्षाः किरातेभ्यो वनवासिभ्यः नुश्वेभ्यो गजवर्ष्म हस्तिनां शरीरं प्र
माणं वा शशंसुरूचुः वर्ष्म देहप्रमाणयोः उन्नतस्थलत्वचो घर्षणं दृष्ट्वा एतावंतो गजाः इति कथने हेतुः। ७७। तत्रेति। तत्र देशे पर्व
ते भवाः पार्वतीयाः पर्वताच्चेति छप्रत्ययः तैः पार्वतीयैर्गणैः सह रघोर्घोरं जन्यं संग्राममभूत् किंभूतं नाराचाणां लोहबाणानां
क्षेपणीयानां भिंदिपालानां अश्मनां निष्पेषः परस्परघर्षणं तस्मादुत्पतितः उत्थितोऽनलोऽग्निर्यत्र तत्तथा युद्धमायोधनं ज
न्यमित्यमरः। ७८। शरैरिति। स रघुः उत्सवसंकेतान् गणान् शरैर्विरतोत्सवान् शरैर्विरतो नष्टः उत्सवो येषां तान् कृ
त्वा बाह्वोर्भुजयोः जयोदाहरणं यशः किन्नरान् गापयामास गणान् उत्सवसंकेतान् जयत्सर्वत्र भारते जैंशो जयोदाहरणमिति
कोषः। ७९। परस्परस्येति। तेषु गणेषु उपायनपाणिषु [illegible] तेषु सत्सु राज्ञा रघुणा [illegible] परस्परं हिमवतो

रामः
७

गिरेः सारो धनं ज्ञातः हिमाद्रिणा चरघोराद्यैः सारो बलं ज्ञातः सारो बलं धनं चेति कोषः। ८३। तत्रेति। तस्मिन्हिमवति गणैरेर
क्षोभ्यं यशोराशिं निवेश्य संस्थाप्य पौलस्त्येन रावणेन तुलितस्य ध्वस्तस्याद्रेः कैलासस्य ह्रियं शोभामादधानो रघुर्हुन्नि
वारुरोह। रुरुदेव। ८४ चकंपइति। तीर्णो लोहित्यो नदीसमुद्रो येन तादृशे तस्मिन्रघौ सति प्राग्ज्योतिषानां कामरूपाणामी
श्वरस्तस्य रघोर्गजालानतां बंधनतां आपन्नैः कालागुरुद्रुमैः कृष्णागुरुतरुभिः सह चकंपे। कंपितः प्राग्ज्योतिषाः काम
रूपाः इत्यमरः। कालागुरवो पि हितलो त्वद्यंते। ८५ नप्रेति। स कामरूपेश्वरो रुद्धस्तिरोहितोऽर्कोयेन तत् अधारावर्षितदुर्दिन
मयं दुर्दिनं यत्र तत्तादृशं अस्य रघोः रथानां वर्त्मरजोपि न प्रसेहे नासहिष्ट पताकिनीं कुत एव न कुतोपीति लोकोक्तिः। ८६ तमिति।
कामरूपाणामीशो भिन्नाः जलं क्षरंतः कटाः कुंभस्थला येषां तैर्नागैर्गजैः तं रघुं भेजे सेवितवान् यैर्गजैरन्यान् प्रतिपक्षरूपान
रीन् उपरुरोध अवरोधीत्। कीदृशं रघुं अतिक्रांतः आखंडलस्येंद्रस्य विक्रमो येन सः तं। ८७ कामेति। स प्राग्ज्योतिषेश्वरः तस्य र
घोः हेमपीठं सुवर्णपीठमेवाधिदेवतं यस्यास्तां तादृशीं पादयोश्छायां रत्नान्येव पुष्पाणि तेषामुपहारो बलिस्ते
नानर्च अपूजयत्। ८८ इतीति। इत्युक्तप्रकारेण जिष्णुर्जयनशीलो रघुर्दिशो जित्वा छत्रैः शून्येषु रहितेषु राज्ञां मौलिषु शिरःसु
रथोद्धतं रजो विश्रमयन् निवेशयन् न्यवर्तत न्यवर्तिष्ट जिष्णुरिति भुवश्च ग्लाजिस्थश्च क्स्नुरिति गकारस्य [illegible]
षोर्गुणाभावः। ८९ सइति। स रघुर्विश्वजिदाख्यं यज्ञमारेभे आरब्धवान् कीदृशं [illegible] सर्वस्वधनं दक्षिणा यस्य तं हि यतः
संतो विवेकिनामादानं विसर्गाय वारिमुचां मेघानामिव विसर्गाय दानाय दानाय दानार्थं तुमर्थे चतुर्थी सतामिति षष्ठी
मेघा अपि गृह्णीत्वा जलं मुंचंतीति। ९० सत्रांतइति। सचिवा नाम मात्यानां सखा सचिवसखः काकुत्स्थो रघुः सत्रस्य यज्ञ
स्यांते अवसाने चिरविरहेण वियोगेनोत्सुका उत्कंठिता अवरोधा लक्षणाः स्त्रियो येषां ते तान् राजन्यान् नृपान् स्वपुराणं स्वन

र० टी० च०

8

गमणं निवृत्तिर्व्यावर्त्तनं तस्मै अनुमेने च अनुज्ञातवान् कीदृशान् राजन्यान् गुर्वीभिर्गरिष्ठाभिः पुर[illegible]स्क्रियाभिः पूजाभिः शमि
तं दूरीकृतं दिग्विजयसमये पराजयजनितं व्यलीकमप्रियं येषां तान् सत्रमाथ्थायदने यज्ञे [illegible] सदो दानेपि च व्यलीकं त्वप्रि
ये न तेऽस्तम रः ।२४। तत इति । ते राजानः सम्राजश्चक्रवर्त्तिनो रघोश्चरणयो युगं युग्मं प्रस्थानसमये कृताभिः प्रणतिभि
र्नमस्कृयाभिः अंगुलीषु मौलिस्रजमधुः शिरोमाला म्लमच्युतो यो सौ मकरंदः कुसुमरजोरेणुः परागस्ताभ्यां गौरं गौरवर्णं
चक्रुः कुर्वंति स्म सम्राजो लक्षणमाह । कीदृशं चरणयुगं रेखोर्ध्वरेखा सा च ध्वजश्च कुलिशं चातपत्रं च तानि तेषां चि
ह्नं यस्य तत्तथा तत्र खातं एवं प्रसादेन लभ्यं सेवं प्राप्यं च अन्वर्थात् प्रहुमशक्यत्वात् इयमपि महर्षिणीयं वृत्तं तल्लक्षणं य
थामो[illegible]बौ गन्धिदशापतिं महर्षिणीयमिति मढ्री ।८८। इति श्री चारित्रवर्द्धनाचार्यविरचितायां रघुटीकायां शिशुहि
तैषिण्यां चतुर्थः सर्गः संपूर्णोऽभूत् ।।४।। शुभमस्तु ।। ।। ।। ।। ।। ।। ।। ।। ।। ।।।। श्रीरामार्पणमस्तु ।। ।।

राम: 8

रघुवंशटीकासर्ग१४प.१

॥भर्तुरिति॥ तत्र ओघात् नेभर्तुः पत्युः अत्यन्तशोचनीयं शोचनीयं दशान्तरं अवस्थान्तरं समं तुल्यकालं प्रपन्ने प्राप्तवत्यौ जनन्यौ मातरौ
कौशल्यासुमित्रे दाशरथी रामलक्ष्मणौ वपश्येतां ददृशतुः यथा १ प्रभ्यां अयनरोच्छेदात् कृतत्यौ लतेहदृष्टे ते उपघ्नावास्त
यइतिनिपातः १ उभावगतेति दिवादिने रूपान्तरेण दुर्विभाव्ये दुर्दर्शनीये कुमुद्वतीशीतमरीचिलेखे वचेद्लेखे इव ते स
पीः नेतावपश्यतां शत्रुघ्नस्य हंतेपो यं शत्रुघ्नावपि हतौ जितौ अरयः शत्रवो याभ्यां तौ विक्रमेण शोभिनौ शोभमानौ प्रणतौ
कृतनमस्कारौ तावुभौ रामलक्ष्मणौ उभाभ्यां मातृभ्यां अन्धे रस्रुभिः यंधतानतया विस्पष्टं न दृष्टौ किं तु शाकुपुत्रालिंग
नसुखस्पर्शरिचितत्वात्तु तत्स्पर्शसुखस्योपलंभोनुभवस्तस्मात् ज्ञातौ २ आनंदजइति तयोर्जनन्योः आनंदाज्जातं आ
नंदजं शिशिरं शीतलं नयनोष्णं आनीतमुष्णं शोकजं अश्रु विभेदः दूरीचकार ३ उल्लेनगी[illegible]गंगाशरय्वोर्जलमवती
र्णौ हिमाद्रेः निःसरद्गंगाशरय्वोर्हिमवतो गङ्गामहिमं रतइतिप्रसिद्धिः उल्लसत्स्थागमस्तपःस्मरः ३ तेइति ते मातरौ
उभयोः रामलक्ष्मणयोः अंगे शरीरे नैर्ऋतानां राक्षसानां शस्त्रघातानां आर्द्रान् नूतनानिवमदंयंयथास्यात्तथा स्पृशंत्यौ
क्षत्रकुलांगनानां क्षत्रियाणां वीरं सुतं मातृत्वे अपि ति विचित्रे कृतवत्[illegible]त्वाविवस्पर्श अकामयेनामितिकर्मणि[illegible]त्वाल्लुः ४ क्ले
शावहेति भर्तुः क्लेशावहा दुःखदायिनी अलक्षणा दुष्टलक्षणा अहं सीतेति स्वनामोदाहरंती कथयंती स्वर्गं प्रतिष्ठा स्थिति
र्यस्य तस्य गुरोः राज्ञो महिषीयं हरा ज्ञौ मक्तिभेदसमावोभक्तिभेदेवधूः सीता ववंदे नमश्चकार यत्केरग्रहणं समनंतरं भर्तु
र्वनवासः श्वसुरस्य स्वर्गस्थितिश्च भवत्यौ वैधव्यं समकृते मह्दिता त्मनो दुष्टलक्षणत्वं सूचितवती [illegible]त्यभिप्रायः अभ
क्तिभावेनेति तत् ती सत्यमेवावुं हुत्वमितस्तनागमामावः ५ उत्तिष्ठेति ते मातरौ[illegible]हियाहौ प्रियया पताप्रियमभिप्यासत्यम्
वतुरस्तुवंत्यौ इति किं मो वत्से पुत्रि उत्तिष्ठ सानुजः सलक्ष्मणः ते तवभर्ता पतिः प्रभुचिंतानिःकल्मषेण तवैव वृत्तेना चारेण
महत्कृच्छ्रं तीर्णवानमनु अघोति अथानंतरं जनन्यौ मित्रौ रामानंदजलैः प्रारब्धं रघुवंशकेतोः रामस्याभि[illegible]षेकं तीर्थ्यम्भ्यत्रा

[margin:] या

हृतैरानीतैः कांचनकुंभतोयैः सुवर्णकलशस्थैः पानीयैरमात्यवृद्धाः प्रवर्त्तयामासुरभ्यकुः ७ सरिदिति सरितो नदीः समुद्राः
सरसी महासरांसि च गत्वा रक्षोभिः कपिभिश्चोपपादितान्यानीतानि जलानि विजिष्णोर्जयनशीलस्य [illegible] तस्य रामस्य मूर्द्ध्नि
न्यपतन् कीदृशस्य मेघप्रभवा समुत्सन्नाः पानीराशिविंध्यस्य पर्वतस्येव शृंगे न्यपतन्नित्यर्थः महासरांसि सरस इति न्यासकारः
८ तपस्वीति यो रामस्तपस्विनां तपोधनानां वेषस्य क्रियया धरणेनापि तावत्सा कल्पेन सुतरां मत्वर्थः प्रेक्षणीयो दर्शनीयो
भूत् तस्य रामस्यालंकारस्य विधानेन या शोभा स्वादितो [illegible] पुनरुक्तदोषाभिधानो दोषो यस्य सा तथाभूताभ
वेत् तापस[illegible]वेषातिशयभयाज्जनेप्यशोभादेहगुणेनुमंतेपि यदि सा कल्पितस्तदा पौनरुक्त्यं संपनीपद्यत इत्यर्थः ९
इति स रामः उत्तोरणः मुक्तं तोरणं वंधुमालाया यस्यास्तां नामन्वयस्य वंशस्य राजधानी पुर्ययोध्यां तां विवेश प्राविशत्
कीदृशः पौरस्त्योभिः कपिभिश्च मिश्रं सैन्यं यस्य स तथा कीदृशी राजधानी तूर्यस्वनैः शब्दैः सानंदा पौरवर्गः यस्यास्तां सौधे
भ्यो मंदिरेभ्यो लक्ष्मणमातासौधस्थितागनाभ्यो मंगलामाक्षतैः वालव्यजने चामरे यस्य स तादृशः भरतेन धृतमातपत्रं
यस्य स तथा रथस्थितः स रामः प्रवृद्धे [illegible] उपायानां सामदानभेददंडानां संघातः समूहः इव सानुजस्तत्र पुरं प्राविशदि
ति सर्वेण संबंधः ११ प्रासादेति प्रासादे [illegible] ता कालस्य [illegible] गुरुः [illegible] बीयोर्वंशात् [illegible] कुटिलगा
मिनी सत्ता वसासव मौकेव वनान्निवृत्तेन प्रत्यागतेन रघूद्वहेन रामेण स्वयं मुक्तो धृतमोचनान्तस्याः पुरः अयोध्या
याः वेणिः कचौच्चयः इव यया दिशां तेन रावणादायातो नायको नायकाया वेणिं मोचयति तथा च हारीतिः न प्रोषिते ग्लं
कुर्यान्न वेणीं मोचयेदिति १२ अथ श्वश्रूजनेति साकेतस्यायोध्यायां नार्यः प्रासादानां वातायनेषु गवाक्षेषु दृश्या

वंधोयेपातै रंजलिभिः रघुवीरपत्नी सीतां प्रणेमुर्नमश्चक्रुः कीदृशी कैकेयीव्यतिरिक्तैः [illegible] श्वश्रूजनैः कल्पितो
रचितो चारुर्वेषो भूषणं यस्याः सा तां तथा कर्णीरथप्रवहल्लोस्य्युतो कर्णीरथः प्रवहणं इत्यमरः २३ स्फुरदिति स्फुरत्प्र
भामंडलो सत्सम्हो यत्र तत् अनुसूयात्रिपत्नी तया दत्तमानुसूयं ... मलिनस्वरमगं गां विचलन्ती दधाना सती ता भर्त्रा रा
मेण पुनर्वह्निगतेव प्रभुदृष्टिति स्वशुर्यैः ... लक्ष्मणया तन्निवासिजनैर्मोद [illegible] शिता अनुसूयादत्तं अंगरागं पर
नापुरुषसंगे मलिनः स्यादिति पातिव्रत्यस्य व्यापनमिति कश्चित् २४ वेश्मानीति सुहृदो भावः सौहार्दं तस्य निधी रामः सु
ह [illegible]ः सुग्रीवादिभ्यः परिवर्हवंति सोपहा[illegible]णि च वेश्मानि गृहाणि विश्राणनप्रदाय लि[illegible] ख्येरा ... चित्रलिखित
स्यापि तु छलिमत्सु ... श्यामप्यामुदस्तनहस्तिकाउ ... गोहोदृमितस्य एतद्धर्मे तु भयपदष्टक्षि ... परिच्छदः परिवर्हस्तत्रोप
करणे अप्रीतमिधान चिंतामणिः २५ कृतांजलिरिति तत्र गृहे कृतांजलीरामो भरतस्य मातुः कैकेय्याः इति लज्जाजहाराणी
त् इति किं मोअवमात ... अस्माकं गुरुः पिता स्वर्ग[illegible] व फलं यस्य तादृशात् सपाधन्ना ... विचार्य मानं त
थे वस्वं कृतं धर्मः यदि दत्तो वरस्तथा नो कृ येत तर्हि मृषावक्[illegible] त्वेन पिता स्वगोष्ठ ... स्यात् त्वं बुध्यांति यासमाजनिष्टेव
तल्लज्जामाम ... चह्यदित्यर्थः २६ तथा चेति चकारः पूर्वेण समुच्चयः स रामः कृत्रिमाभिः कल्पिताभिः संबाधिताभिः रूपभोग्यार्थ
वस्तुभिः सुग्रीवविभीषणादीन् तथोपाचरद् ... यथा संकल्पमात्रे चेतश्चेतनसमनंतरमेवोदिता अग्रे स्थिताः सिद्ध
यो येषां ते सुग्रीवादयश्चेति सिविस्मयेनाश्चर्येणाति क्रांताः सत्यसंकल्पानामपि तेषां यथा विस्मयेनाश्चर्येणातिक्रांतास
त्यसंकल्पानामपि तेषां यथा विस्मयो भूत्तथोपचारः २७ समाजनेति स हि प्रभूरामः समाजनाय प्रत्यर्थं दर्शनाय चोपगता
न्मुनीन [illegible] नगस्त्यादीन् पुरस्कृत्य हृजयित्वा हतस्य शत्रोः रावणस्य प्रभवं उत्पत्तिस्तदादिर्दिग्विजयादिष्टं वृत्तं तेभ्यो मुनिभ्यः शुश्रा

वश्रुतवान् कीदृशः स्वस्य विक्रमपौरुषे गौरवमादधानः कुर्वाणः सभाज[illegible] प्रतिसिवनयोरिति चुरादिः १९ प्रतीति रामस्तपोधने
षु मुनिषु प्रतियातेषु गतेषु सत्सु रक्षःकपीन्द्रान् विभीषणसुग्रीवादीन् विससर्ज स्वगृहं प्रेषयामास कीदृशान् सुखादविज्ञाततोग
तोर्द्धमासोयेषां तान् सीतया स्वहस्तोपहृताग्र्या श्रेष्ठा पूजा येषां तान् १९ तच्चात्मेति रामः आत्मनश्चिन्तया स्मरणमात्रेण सुल
भं सुप्राप्तं सुरारेः रावणस्य जीवितेन सह हृतं तत्पुष्पकं विमानं भूयः पुनः पि कैलासनाथस्य कुबेरस्योद्वहनायानन्वमेस्तत्रेषयामा
स पुष्पकं किमिव दिवः आकाशस्य पुष्पं कुसुममिव २० पितुरिति रामः पितुर्नियोगादादेशाद् वनवासं निस्ती[illegible]यीति क्रमय्य प्र
तिपन्नं लब्धं राज्यं येन स तथा धर्मार्थकामेषु त्रिवर्गेषु यथा समां [illegible] तुल्यां वृत्तिं प्रपेदे प्राप तथैव त्रिषु अवरजेष्वनुजे भ्रातृषु समां
वृत्तिं प्रपन्नवान् २१ सर्वास्विति समः सर्वासु मातृषु वत्सलत्वात् प्रीतिमत्त्वान्निर्विशेषो अप्रतिपत्तिगौरवं यस्य तादृश आसीत् ष
ण्मुखं षड्विधाननैः पीतौ पयोधरौ स्तनौ यासां ता मातृः कृत्तिकाः सुचमूनां नेतारं स्कन्दं इव २२ तेनेति लोभोऽन्यधनाभिलाषस्तस्मान्निरा
ऽसुखेन तेन रामेण करभृतः तेन स्वयं दत्तादधिकं न गृह्णातीत्यर्थः लोकोऽर्थवान् धनिक आसन् अभूवन् विघ्निष्टतरैः क्रियमाणं हि घ्नाद्य
द्भयं तत् घ्नता नाशयता तेनानेन क्रियावान् यज्ञादिसहितो नास अर्थवलोपि नियंतारं [illegible] विना कथं धर्मे प्रवृत्तिरित्याह विनेत्रा शिक्ष
केन तेन लोकः पितृमान् पितृयुक्तः आस अभूत् एव शोकं शोकमपनुदतीति शोकापनुदस्तेन पुत्री सपुत्र आस तेनेति हेतौ तृतीया अत्र
संगतिरीत्या दानेषु [illegible] विभक्तिप्रतिरूपको निपातो वा २३ स इति स रामः पौराणां पुरवासिनां कार्याणि समीक्ष्य दृष्ट्वा काले भोगस्तावैत
स्याः सीतायाः संबंधि तदीयं चारु रम्यं वपुः शरीरं कृत्वा उपभोगोत्सुकया भवतत्रोत्सुकया लक्ष्म्येव विदेहाधिपतेर्दुहित्रा सीतया उपस्थि
तः संगतः सन् [illegible] रेमे चिक्रीड उत्सुकत्वे लक्ष्म्याः करेत्तु उपभुज्यो समानकर्तृकत्वात् क्त्वाप्रत्ययः अथवा कृत्वा वर्तमानयात्स्या ध्याहार्यं समा
नकर्तृक[illegible]त्वा उपस्थानं संगतिमिति वैजयंती २४ तयोरिति चित्रव[illegible]त्सु सचित्रेषु सद्मसु गृहेषु यथाप्रार्थितं यथेष्टं दं[illegible]ड्या
यीन् स्वच्छंदं नवनितादीन् विषयान् आसेदुषोः प्राप्तवतोस्तयोः सीतारामयोर्दंडकेषु दंडकारण्येषु प्राप्तानि सेवितमानानि स्मर्यमाणा

त्यपि दुःखानि सुखी बभूवुः सुखान्यभूवन् पुत्रानुभूतं कष्टं संस्मृत्य हृष्टो बभूवेत्यर्थः २५ अथेति अथानन्तरं सीतामुखेन परिलो
तुर्भर्तू रामस्यानंदयित्री हर्षकर्त्री आसीत् बभूव कीदृशेन स्निग्धे विलोचने यस्य तेन शरोमुंजाविशेषस्तद्वत्पांडुरेण तथाऽनल्परम
कथनेनैव लक्षितोऽर्थो जिन्नकृटितेदोहदं गर्भो येन २६ तमिति प्रीतो हृष्टो रमणो भर्ता रामो रहसि हृष्टा नयदृष्टिर्यस्यास्तां रामां सी
तामंकमुत्संगमारोप्य नीत्वाऽभिलाषं मनोरथं पप्रच्छ पृष्टवान् कीदृशी वर्णेन तरुणशपामवर्णेनाक्रांतं पयोधराग्रं स्तनचूचुकं य
स्यास्तां मतेन गर्भिण्याः स्वभावोक्तिः तथा विलज्जमानो लज्जावती दृष्ट्वा द्विकर्मकः प्रथमगर्भाधाने दोहदश्रुत्यै ह्रीयमाणत्वमु
चितं २७ सेति सा सीता भागीरथ्या गंगायास्तीरे तटे यानि तपोवनानि तानि गंतुमियेषैच्छत् कीदृशानि हंसैर्हंसैर्दृष्टाः कवलि
तानीवारस्य फलानि येषु तानि संवर्द्धिता वैखानसानां वानप्रस्थानां मुनीनां कन्यका येषु तानि तथा कुशादर्भास्तद्युक्तानि कुश
वतीत्यनेन कुशजन्म सूच्यते २८ तस्या इति रघुवीरो रामस्तस्याः सीताया ईप्सितमभिलाषं तत्स्ये सीतायै प्रतिश्रुत्यांगीकृत्य पार्श्वचरै
रनुयातोऽनुगतः मुदितामानंदितलोकामयोध्यामालोकयिष्यन् द्रष्टुमभ्रं माकाशं लिहंति स्पृशंत्यभ्रंलिहं प्रासादमारुरोहारूढ
वान् वहाभ्रंलिहइति मयेत्यालोकयिष्यन्निति क्रियार्थोपपदे ऌट् २९ ऋद्धापणेति स रामः ऋद्धैः समृद्धैः आपणैः पण्यवीथिका
यस्मिन् तं राजमार्गं पश्यन् महामूल्यरत्नादिवाहिनीभिर्नौभिर्विगाह्यमानामवगाह्यमानां सरयूं च पश्यन् विलासिन स्त्रीवि
लासिन्यस्त्रैर्विलासिभिः पुरनिवासिभिः समिरध्युषितान्यधिष्ठितानि पुरोपवनानि पुरीपरिसरोद्यानानि पश्यं प्रचरेमे तुतोष एतेन
द्व्यसमृद्धिर्द्वयप्राक्तृपायो द्रव्यस्यानुरूपवाव श्योक्तः ३० स इति विशुद्धं वृत्तमाचारो यस्य तत्स्य वदतां मध्ये पुरोगोऽग्रणीः सर्पा
धिराजः शेषस्तद्वदुरू विशालौ भुजौ यस्य सः विहतेनाधिक्षिप्ता भरीणां भद्रकल्याणं येन सः तादृशो रामः स्वस्यात्मनि वृत्तं चरित्रमुद्दि
श्य भद्रनामानमपसर्पं चारं किंवदंतीं जनश्रुतिं पप्रच्छ पौरा मां स्वचरित्रं मम चरित्रं वा वदंती त्यपृच्छदित्यर्थः किंवदंती जन
श्रुतिरित्यमरः अपसर्पश्चरश्चार इति हलायुधः ३१ निर्बंधेति निर्बंधेन हठेन पृष्टः स चरो जगाद अब्रवीत् किमवोचदित्याह मां मान
वदेव नरेंद्र त्वो भवनोषितायाः रावणगृहस्थितायाः देव्याः सीतायाः परिग्रहात् स्वीकारादन्यत्र नैतद्वर्जयित्वा सर्वे पौरास्त्वदीयं च

रितं स्तु वेति स … तस्यापि … हे कलत्रेशकनीयं किं पुनर्दुराचारस्य राक्षसराज्यस्येति भावः अन्यत्रेति वर्जनार्थेऽव्ययं ३२ कलत्रेति
कलत्रस्य भार्याया निंदया गुरुणा दुःसहेन कीर्त्तिविपर्ययेनाशस्तुनाम्नाहतं ताडितं वैदेहावंधुस्तस्य रामस्य हृदयं विददृ विदीर्णं अयस्कसीताभि
लितमन्व तदानीं पृथग्जनीत्यर्थः अयो निर्मितेन घनेनेन हस्तकूटेन हतं तप्तमयो यथा विदलतीति किलेत्यरुचौ ननु डीङ्कृ :योः संज्ञा छंदसो
र्वकुलमिति संज्ञायां छंदसि च ह्रस्वविधानात्कथं वैदेहिबंधोरिति उच्यते बहुलं वचनादसंज्ञायामपि भवति विदददृ इति कर्मकर्त्तर्यात्मने
पदं घनं कठिनं संघातमेघका … मुद्गरे इति वैजयंती ३३ किमिति स राम इति द्वयोः पक्षयोर्मध्ये एकस्य पक्षस्याश्रये यदि क्लीवत्वं
भीरुत्वं तस्माद्दोलावच्चला चलं चलाप्रवृत्तिर्यस्य तादृश आसीत् ३४ इति किं आत्मनो निर्वादो निंदा तत्कथां किमुपेक्षे उद्धारयामि उता
पवालो कालीकवाक्याद्दोषात् जायां पत्नीं जामि सप्रहे लोट् अवर्णीदेषप निर्वादमित्यमरः निवृत्तिर्वा अपवादं निश्चितात्पत्न्याः सीता
यास्त्यागेन परिमार्ष्टुं निवर्त्तयितुमेमि छंतत् अन्यतान्तो कापवादात्कथं पत्नीपरित्यागरूत्या हा हि यतो यशोधनानां स्वदेहात्स्वशरीरादपि
यशो गरिष्ठं इंद्रियार्थादंगनादेः किमुत तत्त्यागे कः संशय इत्यर्थः ३५ स इति स रामोऽवरजाननुजानस्मात्तत्र कौलीनमाचचक्षे कथयत्
कीदृशो एनो निंदाश्रवणाहतेंगतमोजो यस्य सः कीदृशान् अश्रुतत्त्तः तस्य रामस्य विक्रियाया विकारस्य दर्शनाल्लुप्तो हर्षो येषां तान् कौली
नकथनानंतरं पुनरिदं वक्ष्यमाणं वाक्यमुवाच कौलीनं जनवादे स्यादित्यमरः ३६ राजर्षीति स दाचारेण उच्चैः सुधाद्वेः सकाशात्प्रसू
तिर्यं जन्म यस्य तादृशस्य राजर्षिवंशस्य मत्तो मत्सकाशात् कीदृशो यं कलंक उपस्थित उत्थितः पश्यत पयोदवातादम्बुदरमासंयुक्तो
दर्पणस्य यथा कलंको मलिनमा भवति ३७ पौरेष्विति अप्रापणीयानां तरंगे बुतैलविंदुमिव पौरेषु पुरवासिषु बहुली भवंतं माधि
कं प्रसरंतं स एव पूर्वः प्रथमो यत्र तत्पूर्वं नवं मपवादं सोढुं सहेने शोन समर्थः आलानाय गजबंधनाय कल्पितमालानिकं स्तंभं
गजो न सहते ३८ तस्येति उपस्थितायामपि अपत्यस्य फलस्य प्रवृत्तौ प्राप्तौ न विद्यते अपेक्षा यस्य सता दृशः सोऽहं तस्या … दसा
घ्नेनोदायस्फोटनाय वैदेहसुतां सीतां तत्याजामित्य त्कुमिष्टामि कामिव पितुराज्ञया पुरस्तात्पूर्वस्मिन् समुद्रनेमिर्यस्याः तां महीमिव भूमि
परित्यागेन राज्यप्राप्तुरेव फलप्रवृत्तिः किमियमसतीयत्पत्नत इत्यत आह ३९ अवैमीति अनघामिति पापेति चैनां सीतामवैमि जानामि

५२

४

परंतु लोके शुभ्रसिद्धो पवादो लोकापवादो मे बलवान् [illegible]दुःसहो मतः तदेवोपपादयति भूमेश्छायायां शशिविंबं शुद्धिमतो निःकलंकस्य श
शिनश्चंद्रमसो मलत्वे कलंकत्वे प्रजाभिर्लोकैर्निरूपिता कल्पिता शशकमेके अपरे भ्रमं अपरे छायेत्यन्येवं इत्यातो मालिन्यस्य संसमि
तिकेचित् एवं कृतमपदैकाश्रयणे दमुक्तं यदि लोकापवादएवगरीयान् तर्हि किमर्थं दशग्रीवादिघातार्थं प्रयासो विहित इत्यतआह
४० रक्षोवधेति रक्षोवधांतो रावणवधपर्यंतो मे प्रयासो व्यर्थो निरर्थो न भवति सा सीतानिमित्तं भवति किंतु वैरप्रतिमोचनाय विरोधमु
क्तये अत्र दृष्टांतमाह अमर्षणः क्रोधजिह्विर्जिह्मः सर्पः पवाचरणेन स्पृष्टांतं नरं शोणितस्य रुधिरस्य कांक्षया वांछया तया किं स्पृशत्यपि
पुनः पदं घ्रिश्चरणो स्त्रियामित्यमरः ४१ तदेति तत्तस्मात्कारणात्करुणया कृपयार्द्रचित्ते ये वो तैर्भवद्भिर्मे मे एष सर्गो निश्च[illegible]यो
न प्रतिषेधनीयो न [illegible] निवार्यः तत्र कारणमाह निर्गतं वाच्यमेव शल्यं येषु स्तान् प्राणान्मया चिरं धारयितुं यदि वो युष्मा
कमर्थिता तर्हि न निषेध्य इत्यर्थः सर्गः स्वभावनिर्मोक्षनिश्चयाध्यानसृष्टिष्वित्यमरः गति बुद्धीत्यादिना नियमान्मयेति कर्तरि
तृतीया ४२ इतीति इति पूर्वमुक्तवंतं जनकात्मजा [illegible] यां सीतायां नितांतरूक्षो भिनिवेश आग्रहो यस्य सतमीशं प्रभुं निव
हुमनुमोदितुमनुमंतुं च न शुभ्रात्सु मध्ये कश्चन शक्तो न समर्थो भूत ४३ स इति लोकत्रये गीता कीर्तिर्यस्य सयथार्थभावः सत्य
वादी लक्ष्मणः पूर्वजन्मा सरामो निर्दिशेस्थिते लक्ष्मणं सौम्येति वाभाष्य संबोध्येतरभ्रातृभ्यः पृथक् एकांते इत्यादिदेश आज्ञापयत् न
नु सा स्यदेवरत्वेत्याधिकृत्य सोघातघाणिति विधानादन्यत्र सौम्येति चिंत्यं उपमानात्साधुरित्येके सोमदेवतास्मिह तु रतः सुंदरपित
त्ति हेतुत्वादुपचारात्सौम्य इत्युच्यते सौम्यं सुंदरे सोमदेवते इति ४४ प्रजावतीति तव प्रजावती भ्रातृजाया दोहदं गर्भिण्यभि
लाषस्तत् शंसतीति दोहदशंसिनी तपोवने पुस्पृहयालुः स्पृहावती अतः सत्वं रथी रथस्थितः तस्य तपोवनावलोकनाभिलाषस्य
व्यपदेशो व्याजस्तेन नेयामेनां सीतां वाल्मीकेः पदमाश्रमं प्रापय्य तपोवने प्रापितायेषि तस्याविवदितता तस्य हेरी श्रित इतिप्रासस्य
संपादनस्याभावव्यप[illegible]देशाभिधलत्वान्निर्व्याजोक्तेयेतदभिधानचिंतामणिः ४५ स इति पितुर्जमदग्नेर्निदेशादाज्ञया भार्गवेण पर
शुरामेण मातरि रेणुकायां निःशंकं प्रहृतमिति सुश्रूषवान् श्रुतवान् तत एव [illegible] सत्य लक्ष्मणाग्रजस्य रामस्य तद्वाक्यं शासनं प्रत्यग्रहीत् स्वीचक्रे तथा

४

पि[illegible]दृष्टकर्मण्यपि विमृश्य कथमंगीकारः इत्यत आह स्थिरेति गुरूणामाज्ञा ऽविचारणीया अग्रजस्य जनककल्पत्वात् गुरुत्वं ४६
अथेति अथानन्तरं लक्ष्मणो वैदेहसुतां सीतां रथमारोप्य प्रतस्थे प्रास्थित किंभूतां भवत्याभ्यर्थितं यत्तपोवनं प्रा
पयामि विजीयतामित्यनुकूलश्रवणेन प्रतीतां हृष्टां कीदृशं रथं अत्रस्नुभिर्मृदुगामिभिस्तुरंगैर्युक्ता धूर्यस्य तं
तथा सुमन्त्रेण प्रतिपन्ना गृहीता रश्मयः प्रग्रहा यस्य तं अत्रस्नुभिरित्यनेन गर्भपीडाभावः सूच्यते ४७ सा नीरेति सा रुचिरान्प्रान्
प्रदेशान्नीयमाना सीता मे प्रियो रामः प्रियंकरो तीति प्रियंकरः इत्यमनन्ददानन्दं चक्रे आत्मनि कल्पद्रुमतां देववृक्षतां असयस्ख
पत्राणि यस्य सोसिपत्रः स हेतुः वृक्षस्तं जातं तं प्रियं नाबुद्ध नाज्ञासीत् अपि प्रियंकर इति च्छेमप्रियमदुःखमेतिवच ४८ जुगावेति लक्ष्म
णो यदप्रियं जुगोपत तदप्रियं पथि स्फुरता सव्येतरेण दक्षिणेन तस्याः सीताया अक्ष्णा नेत्रेण स्वयं सीतायै आख्यातं कथितं कीदृशमप्रि
यं गुरुभाविदुःखं यत्र तत् कीदृशेन लक्ष्मणेन प्रियस्य रामस्य दर्शनं यस्य तेन ४९ सेति दुर्निमित्तेनोपशकुनेनोपागता
प्राप्ता द्विषादात् सद्य एव म्लानं मुखमरविन्दं पद्ममिव यस्याः सा सीता अबाह्यैरन्तरैः करणैर्मनोबुद्ध्यहंकाराख्यैः सानुजस्य सभ्रातृका
स्य शिवं कल्याणं भूयादित्याशशंसे इच्छति स्म ५० गुरोरिति गुरो रामस्यादेशात् साध्वीं सीतां विहास्यन् त्यक्ष्यन् कामः सुमित्रातनयो लक्ष्म
णः पुरस्तादग्रे स्थितया जह्नोर्दुहित्रा गंगया उद्धृता उत्थिता वीचय एव हस्तास्तैर्वार्यमाण इव निवारित एव मौनवैतत्कर्तुं नियुक्तः ५१
रथादिति यन्त्रा सारथिना प्रतिपन्ना नियमिता वाहा अश्वा यस्य तस्माद्रथात् भ्रातृजायां सीतां पुलिने सैकते ऽवतार्य लक्ष्मणो गंगां
ततार तीर्णवान् कः कामिव सत्यसंधः प्रतिज्ञा यस्य तादृशः संधां प्रतिज्ञामिव कीदृशीं गां निषादैर्धीवरैराहृता नौर्विशेषो य
स्यां सा तां सीतयोः समर्पितस्य धार्यस्य आख्येयमनभ्यासीत तन्मुज्झाणजगादेति वत्सामालेन विरोधः स्यात् अथेति अथानन्तरं
सौमित्रिर्लक्ष्मणः कौलीनभीतेन रामेणोक्तं त्यक्ता सीतेत्येवंरूपं महीपतेः राज्ञः शासनं कथंचिन्महता कष्टेनोज्जिरति स्म कीदृशः यथा मे
घ उत्पातिकमुत्पातसूचकमश्मवर्षं शिलावर्षमुज्जिरति ५३ तइति सा सीता तालतेव स्वमूर्तेः [illegible] शरीरस्य प्रकृतिं कारणम्

तो धरित्रीभुवं सहसा कस्मा(द)जगाम कीदृशी अभि[illegible]षंगः परिभवः स एवानिलस्तेन प्रविद्धा विद्धिन्ना प्रम्लापमानाप्याभरणानि एव
प्रसूतानि पुष्पाणि यस्याः सा ५४ इक्ष्वाकिति इक्ष्वाकुवंशप्रभवो जातः आर्यवृत्तः साधुचरितः पती रामोऽकस्मादविचार्य कथं त्वां त्य
जेदिति संशयेनैव संशयो जातोऽस्या संशयिता जननी माता क्षितिभृस्तस्यै सीतायै तावत्प्रवेशं न ददौ न दत्तवती तावदित्यने
न पश्चाद्दत्तवतीति सूच्यते संशयितेति तदस्य संजातं तारकादित्वादितच् ५५ सेति लुप्तागता संज्ञा चेतना यस्याः सा सा सीता दुःखेन वि
वेदनायासीत् प्रत्यागता असवः प्राणा यस्याः सा अंतश्चित्ते समतप्यत तस्माद्धेतोः अतः सुमित्रात्मजो लक्ष्मणस्तस्य यत्नाल्लब्धस्तस्याः प्र
बोधो ज्ञानं मोहा[illegible]न्मूर्च्छातः कष्टतरो दुःखेदोऽप्यासीत् ५६ न सेति आर्या कुलशीलादियुक्ता सा सीता वृजिनादृते पापं विना [illegible]

नावोचत

[illegible] निराकरिष्णोः स्वजो भर्त्तुः पत्युरवर्णं दोषं नावदत् किंतु स्थिरं भजनीति तादृशा दुःकृतिनं पापिनमात्मानमेव पुनः पुनर्मुहुर्मुहुर्निनिं
दगर्हितवती ५७ आश्वास्येति रामावरजो लक्ष्मणः आख्यातः कथितो वाल्मीकिर्निकेतस्याश्रमस्य मार्गो येन तादृशः सन् तां सीतां
आश्वास्य निघ्नस्य परवशस्य मे भर्त्तुरादेशाद्यद्रौक्ष्यं भो देवि तत्क्षमस्वेति नम्रः प्रणतोऽभूत् ५८ सीतेति सीता तं लक्ष्मणमुत्थाप्य
वाक्यं जगाद अवदत् किमाह भो पुत्र तेऽहं प्रीतास्मि चि[illegible]रं जीव यद्यतोऽग्रजेन [illegible]ज्येष्ठेन विडौजसा शक्रेण विष्णुरिव भ्रात्रा रामेण
त्वं [illegible] परवान् पराधीनोऽसि परवांस्तु पराधीन इत्यमरः ५९ श्वश्रूजनेति प्रापितो निवेदितो मत्प्रणामो येन स त्वं सर्वश्वश्रूजनं ज्ये
ष्ठानुक्रमेण विज्ञापयेः विज्ञापनामाह मयि वर्द्धमानं सूनो राघवस्य प्रजानिषेकं गर्भरूपं चेतसानुध्यायत अनुस्मरतेति विज्ञापयेः विज्ञा
पनालिङ् प्रजानिषेकं सूनोरित्यनेनास्य कस्यापीति चित्ते माकार्षुरिति सूच्यते ६० वाचेति स राजा रामो मद्वचनात् सीतयाभिहितमत
दिति पुरस्कृत्य त्वया वाच्यः वाच्यस्वरूपमाह यत्समक्षं प्रत्यक्षं तव वह्नौ विशुद्धां निर्मलामपि मां लोकवादश्रवणाद्दहासीः दत्त्वा हीघ
चन्मश्रुतस्य विद्यायाः सदृशं अथवा कुलस्य वंशस्य गरीयसा प्रत्ययमाणेनाधिगतं ममनैर्मल्यमनादृत्य वेजितसंशयपयुक्तौ सरोत्ता
जनापवादश्रवणादेव त्यक्तवतस्तव सदृशं व्यवहाराभिजनस्य विद्यान्वययोः सदृशमिति सीताया वचोक्तिः ६१ कल्याणेति अथवेतिप्र
दीतरे [illegible] वक्रोक्तिकथनरूपं त्वं [illegible] परिहरन्ति भो कल्याणबुद्धे [illegible] मन्मते नवाय परित्यागरूपः कामचारः स्वेच्छाचारो मयि न शं

कनीयः कुतस्तर्हि त्यागः इत्याह ममैव जन्मांतरे कृतानां पातकानां पापानां विपाकः परिणामः स्तस्य विस्फूर्यथुः समुद्धिः अप्रसह्यो दु
स्सहः ममैव दुःकर्मफलं न तवेति कल्याणबुद्धे इति संबोधनं ६२ उ[illegible]पेति पूर्वमुपस्थितां प्राक्प्राप्तां लक्ष्मीमपास्य त्यक्त्वा मया सार्द्धं वनं प्रप
न्नो गतोसि तथा लब्ध्वा त्वद्भवने मवर्द्धे हे वसती त्वद्गृहे वासं न सोढास्मि किं कृत्वा त्वया आस्पदं प्राप्य यद्यप्यत्रोत्रे त्वद्योतकं पदं नास्ति तथा
प्यर्थाद्द्रष्टव्या वा गा ६३ निशेति भवतः प्रसादादनुग्रहान्निशाचरैः रक्षोभिः रुपप्लुता उपद्रुता भर्त्तारो यासां ताः तासां तपस्विनीनां शरणं
साधुः शरण्या भूत्वा त्वयि दीप्यमाने जाग्रति सति अन्यं शरणार्थं कथं प्रपत्स्ये ६४ किंवेति अथवा [illegible] ऽत्यंत वियोगे मोघेन निष्फलेऽस्मिन् हत
जीविते [illegible] उपेक्षामुदासीनतां कुर्यां यदि संतानोत्पत्तिहेतुत्वाद्रक्षणीयं अंतर्गतं मम मादरं स्थितं त्वदीयं तेजः शुक्रं मे तरायो विघ्नो न
स्यात् यद्यपेक्षामिति पाठः जीविते किमपेक्षां कुर्यां ६५ साहमिति सूर्ये निबद्धा दत्ता दृष्टिर्यया साहं प्रसूतेः प्रसवादूर्द्धमनंतरं तपश्चरि
तुं कर्तुं यतिष्ये यत्नं करिष्यामि यथा जन्मांतरे जन्मांतरेपि भूयः पुनस्त्वमेव भर्त्ता पतिः स्याः विप्रयोगो न स्यात् ६६ नृपस्येति वर्णानां
ब्राह्मणक्षत्रियविट्शूद्राणां आश्रमाणां ब्रह्मचारिगृहिवानप्रस्थभिक्षूणां पालनं रक्षणं यत् स च नृपस्य धर्मो मनुना प्रणीतः प्रोक्तः अतो हेतो
र्न्निर्वासिता निःकासिताप्यहं त्वया तपस्विसामान्यं तुल्यमेव चालनीया ईक्ष्या यथान्ये तापसा रक्षणीयास्तथाहमपीत्यर्थः ६७ तथेति
तथास्त्वेवमस्त्विति वाचं प्रतिगृह्य स्वीकृत्य रामानुजे लक्ष्मणे दृष्टिपथं लोचनमार्गमतीते विक्रांते सति व्यसनस्य दुःखस्यातिभारः आधिक्यं तत
स्मात् सीता विग्ना कुररी पक्षिभेदः सेव मुक्तकंठं यथा स्यात्तथा चक्रंद रुरोद ६८ नृत्यमिति समं तुल्यं दुःखं यस्य तत्तद्भावं प्रपन्ने प्राप्ते वनेपि त
स्याः सीताया रुदितमत्यर्थमासीत् कथं मयूरा नृत्यं विजहुस्तत्यजुः वृक्षाः कुसुमानि हरिण्यो मृगांगना उपात्तान् गृहीतान् तस्याः दुः
खेन चेतना अपि समदुःखा बभूवुरित्यर्थः ६९ तामिति रुदितमनुसारी कुशानामिध्मानां काष्ठानामाहरणाय यानं यातो गतः कविर्वा
ल्मीकिस्तामभितो सीतां लक्ष्मीकृतस्य कस्येदं रुदितमिति ज्ञातुकामो ऽगच्छत् यस्य वाल्मीकेः शोकः श्लोकत्वमापद्यत प्राप्तः कीदृशः
शोकः निषादेन [illegible] विद्धः अंडजस्य पक्षिणो दर्शनादुत्थितः संम्लोको यथा मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः यत्क्रौंचमिथुनादेकमवधीः
मा

काममोहितमिति ७० तमिति नेत्रयोरावरणमाच्छादनमश्रुबाष्पं प्रमृज्य विलापाद्विरता निवृत्ता सा सीता तं वाल्मीकिं ववंदे नमश्चक्रे
स मुनिरस्या दोहदस्य गर्भस्य लिंगं चिह्नं पश्यतीति दोहदलिंगदर्शी तस्यै लभस्व सत्पुत्रमित्याशीः पुत्राशीस्तां दाश्वान् दत्तवानितिव
दमानमुवाच दाश्वान् साह्वानिति निपातितः दत्वेति वा पाठः ७१ जानइति मिथ्यापवादात् क्षुभितेन व्याकुलितेन भर्त्रा रामेण विसृ
ष्टां मुक्तां त्वां प्रणिधानतः समाधेर्जाने तत्तस्मात्कारणान्मा व्यथिष्ठाः व्यथां माकार्षीः यतो भो वैदेहि सीते विषयएकोदेशोंतरे मध्ये यस्य
तत्तस्य पितुर्निकेतं गृहं प्राप्तमिव अथवा जनकदेशादन्यत्र देशस्थं पितुर्निकेतमित्यर्थः ७२ उत्खातेति उत्खातो लोक[illegible]त्रयस्य कंटको
रावणो येन तस्मिन् सत्या प्रतिज्ञा यस्य तस्मिन् अविकत्थने नात्मश्लाघिनि अकस्मादविचार्य त्वां प्रति कलुषा प्रवृत्तिर्यस्य तादृशे भ[illegible]
रताग्रजे रामे मे ममापि मन्युः क्रोधोऽस्त्येव ७३ तवेति उरुरधिका कीर्तिर्यस्य तादृशस्तव श्वशुरो दशरथो मम सखा ते पिता जनकश्च स
तां मुमुक्षूणां भवस्य संसारस्योच्छेदं ध्वंसं सेयुस्तथा विधोपदेष्टा त्वं च पतिव्रतानां धुरि पुरः स्थिता एवं सति तत्किं येन ममानुकंपा नासि नम
वसि यद्यपि व्रती समस्तप्राणिषु समानचेतास्तथापि सीताविश्वासनायेयमुक्तिः ७४ तपस्वीति अस्मिंस्तपोवने वीतभयं यस्याः सा त्वं
वसतिष्ठ कीदृशे तपस्विनां संसर्गेण विनीताः शिक्षिताः सत्वा व्याघ्रादयो यत्र इतोनघा निष्पापा प्रसूतिर्यस्यास्तादृश्यास्ते इतो मत्सकाशादपत्यानां
संस्काररूपो विधिर्जातकर्मादिर्भविष्यति ७५ अशून्येति मुनीनां सन्निवेशैः पर्णशालाभिरशून्यं शून्यतीरं यस्यास्तां तमसः कलुषस्यापहंत्रीं तमसां नदीं
विगाह्य स्नात्वा यस्याः सैकतोत्संगे बलिक्रियाभिः पूजाविधानैस्ते मनसश्चित्तस्य प्रसादः प्रसन्नो भवति ७६ पुष्पमिति उदाराः प्रग[illegible]ल्भाः वाचो यासां ता मु
निकन्यका नवोभिषंगो दुःखं यस्यास्तां त्वां विनोदयिष्यंति कीदृश्यः ऋतौ भवमार्तवं पुष्पं फलं च तथा बकालेयदकृष्टरोहि अहलकर्षणजा
तं वीजं नीवारं चाहरंत्यः ७७ पय इति पयसा जलेन पूर्णा घटाः पयोघटास्तैराश्रमस्य बालवृक्षान् स्वबलानुरूपैर्निजशक्तिसदृशैर्यथा स्यात्तथा सं
वर्धयंती तनयोत्पत्तेः प्राक् पूर्वं स्तनंधयस्य बालस्य प्रीतिं प्राप्स्यसि त्वं पूर्णा मे वालाः पाकः शिशुर्डिंभः पोतः शावः स्तनंधय इत्यभिधानचिंता
मणिः ७८ अन्विति दयया करुणयार्द्रं चित्तं यस्य स वाल्मीकिर्मुनिरनुग्रहेण प्रसादेनाभिनंदिनीं तां सीतां स्वनिजाश्रमं निनायानीतवान् कीदृ
शं सायं मृगैरध्यासिते वेदिपार्श्वे यस्मिन् तथा शांता मृगा यत्र तं ७९ [ता]मिति ऋषिः शोकेन दीनां तां सीतां तस्याः सीतायाः आगमे प्रीतिर्यासां

नां सुतां प्रसीषुत समर्पयामास स प्रादात्तया दर्शि अमार्वस्थापित निर्निविष्ट उपभुक्तः तास्तोयस्यास्तां हि मां शोभं द्द सीतां त्वाममंतिमां कलामो
पधीपुत्रा जयति ।८०। तानिति तास्ता पस्यइंगुदी तैलेन कृताः दीपा यत्र तं अंतर्मध्ये आसीत् ऐ मेध्यं पवित्रं अजिनं मृग चर्म वितल्पं यत्र तथा भूत
मुटजे पर्णगृहे सपर्यानुपदं रूजानंतरं तस्यै सीतायै दिनांते सेध्या यो वितेरु: इंगुदी तापसतरुरित्यमरः ।८१। तत्रेति तत्राश्रमे वसंती
सा सीतापत्युर्भर्तू रामस्य प्रजायाः संततेः संततिः पारं पर्यंत स्येवम्मेन फलमूलादिना शरीरं वभार पोषयति स्म कीदृशी आभिषेके स्नाने श्रप
तां तत्पराविविधैर्भोगैर्नानाप्रकारैर्भोगः तिथिमपः प्रयुक्ता रूजाययामास तथा कलिनी तस्त्व चं दधाना प्रजासंततिलोकयोरिति विश्वः संत
तिः स्तन्नवायिस्यात्तारं पर्यंसुतेपि चेतिया दवः प्रजार्थं न तु जीविनार्थं शरीरं पुपोषेत्यर्थः ।८२। अपीति अधुना सांप्रतमपि प्रियो रामः सानु
शयो नु ग्रहवान् स्यादित्युत्सुकः शक्रजितो हंतालक्ष्मणो पि सीतायाः परिदेवनं विलापं तेयत्र तदनुष्ठितशासनमाज्ञामग्रजाय रामाय शशंस कथ
यामास ।८३। वभूवेति सहसाशीघ्रं तं च बलात् सनयेवत्तु कारवर्षी हिमवर्षि शीलः सहस्य पौषस्य चंद्र इव रामः प्रवाष्पः समस्तुवर्भूव कौलीनात्
लोका पवादाद्भीतेन रामेण वैदेहसुता सीता निरस्ता निःकासिता मनस्तस्मिन्नुत्ता न पौषस्ते षः सहस्य वदित्यभिआन चिंतामणिः मनस्तत्वद्य इति पच
म्यास्तसिल् ।८४। निगृह्येति स रामः स्वयमेव शोकं निगृह्य समृद्धं राज्यं शशास रक्ष कीदृशो रामः वर्णाश्रमादेव जागरूकः प्रबोधयु
क्तः तथा परजोगुणाः त्याग गुणात्रिरिक्त पृथक्कृतं मनो यस्य सतथा धीमान् पंडितः कीदृशं भ्रातृभिः साधारणभोगोयस्ते सिंस्ता दृशं ।८५। तसे
केति पत्नीवर्जिते स्वातरोवसाध्वी सती मध्ये को भार्या त्वा कवत स्तस्य न पस्य रामस्य वक्षसि गृहे अरूवलितसुखं यस्याः तथाव संतीलक्ष्मीः
सपत्नीरहिते वरे मे विक्रीडा ।८६। सीता मिति दशमुखस्य रिपुः शत्रूरामः सीतां हि त्वा तत्कायदन्यां कन्यां नोपयेमे न व्याहे प
त यस्तत्स्याः सीतायाः प्रतिकृतेः सौवर्णः प्रतिमायाः सहितः क्रतूनश्वमेधानाजहार चक्रे श्रवणयोर्विषयं देशं प्रापितं भाप्तेन तस्यम
र्तू रामस्य वृत्तांतेन सा सीता दुर्वारावाध्या पीडा यस्य तत्परित्यागदुःखं विषेहे सहते स्म पीडावाधा व्यथा दुःखमित्यमरः दुर्वारव्यथामित्य
त्र पुनरुक्तं चिंत्यं विस्रष्टविशेषणान्न दोषदोषः इति केचित् ।८७। इति श्रीचारित्रवर्धनविरचितायां शिशुहितैषिण्यां राघवीयकाव्यटीकायां
चतुर्दशः सर्गः ।१४। केशव ।। वासुदेव ।। ।।नारायण ।।गोविंद ।।विष्णु ।। ।।श्रीकृष्णायनमः ।। ।।वलदेव ।।। रामचंद्र ।। ।। ।।शुभम् ।।

रघुवंशटीकासर्ग१५प०६

२ ॥श्रीः॥ॐ॥ कृतः सीतायाः परित्यागो येन स तथा पृथिवीपालो रामो रत्नाकरो मे[illegible]खला यस्यास्तां पृथ्वीं भुवमेव बुभुजे उपभुक्तवान् भुजोनवत
इत्यात्मनेपदं अनवनस्य प्रयोगार्थो दिवं मस्तत्वान विमोच्य ते महीमित्यस्य निरस्तापि निर्णीत केवलमिति त्रिलिङ्गत्वेन कृतपयोरित्यमरोक्ते
त्वात्केवलशब्दः समस्तार्थे अन्यथैकार्थे प्रयुक्ते पुनः केवलशब्दप्रयोगो पौनरुक्त्यं प्रतिपादयति केऽप्यन्यथा समादधते अन्ययोगे व्यवच्छे
दाययेच कारो योगनिरासार्थः केवलशब्दः केसुखे च लासमयामित्यन्ये २ लवणेनेति यमुनां भुंजतीति यमुनाभुजः कालिन्दीतटवासिनो मुन
यः शरण्यं रक्षितारमभिलषतः संतः शरण्यो साधुं शरण्यं तं राममभिययुः संमुखमागताः निस्पृहाणां तेषां किमर्थमागमनमित्यत आह यतस्ते मि
श्यायां वसतीलितामिस्वस्तेन लवणेन रक्षसा विलुप्ता ध्वस्ता इज्या यज्ञा येषां ते शापेन किमिति तेन भस्मसान्न कुर्वन्त्यत आह २ अवेक्ष्येति
ते मुनयस्तं राममवेक्ष्य दृष्ट्वा रक्षितारामो विद्यते इति विचार्य तस्मिंल्लवणे स्वतेजसा न प्रजघ्नुर्न प्राहरन् तत्र कारणमाह [illegible] शापएवास्त्रं येषां
ते शापास्त्रा मुनयस्त्राता यत इति प्राणोरक्षकस्तस्याभावे तपसो व्ययेनाशंकुर्वीति त्राणे इति कर्त्तरि बाहुलकाल्ल्युट् अपरस्मात् [illegible]त्राणाभाव इति
भावे वा ३ प्रतीति काकुत्स्थो [illegible] रामस्तेभ्यो मुनिभ्यो विघ्नस्य प्र[illegible]तिक्रियां निराकरणं प्रतिशुश्राव रचीकार अत्रार्थे हेतुमाह भुवि शार्ङ्गिणो वि
ष्णोः प्रवृत्तिरवतारो धर्मस्य संरक्षणार्थः संरक्षणमेवार्थो यस्याः सा तेभ्य इति प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्त्तेति संप्रदानत्वं ४ त इति ते मुनयो
विबुधेभ्यो देवेभ्यो द्विष्टीति यस्तस्य लवणस्य वधोपायमाचख्युः कथयामासुः [illegible] तमेवाह शूली शूलशस्त्रयु
क्तो लवणो दुर्जयो जेतुमशक्योऽत एव विशूलः शूलरहितः प्रार्थितामभिगम्य तां अभियाने च यात्रायां प्रार्थनेपि ५ आदिदेशेति अ
थानंतरं राघवो रामस्तेषां मुनीनां क्षेमाय शत्रुघ्नमादिदेश तूपयत् उत्तरे सते अरेर्लवणस्य निग्रहाद्वधादस्य नामयथार्थं शत्रून्हन्तीति
त्यन्वर्थरूपं करिष्येलकर्त्तुमिव अमनुष्यकर्त्तृके चेति टक्प्रत्ययस्य विधानात्कथं शत्रुघ्न इति अस्य देवत्वविवक्षया अमनुष्यकर्त्तृकत्वं अथवा
मूलविभुजादित्वात्क इति वार्त्तिककारः यः कोऽपि कथमरातिं जयेदित्यत आह ६ यत इति यतो रघूणां मध्ये यः कश्चन एकः प
रंतपः परं शत्रुं निवर्तयितुमीश्वरः समर्थः कः कमिव उत्सर्गः कर्मण्यणित्यादिः सामान्यविधिं निषेद्धुं अपवादः आतोनुपसर्गे क इत्यादि
विशेषविधिरिव परंतप इति द्विषत्परयोस्तापेरिति खश् ७ अग्रजेनेति अग्रजेन रामेण प्रयुक्ताशीर्यस्य स तथाविधः ते भीमं यं यस्याः सा

वभौः तथा दाशरथिः शत्रुघ्नः पुष्पिताः कुसुमिताः सुरभीः सुगंधवनस्थलीः पश्यन्नयोगात्‌ः ८ रामेति रामादेशाद्रामस्याज्ञया सेनां गंगजवाजिरथप
त्तिलक्षणं कार्यसिद्धये सेनानिरपेक्षः ये वाऽरातिनिग्रहे हृत्स्यामस्प नतस्य शत्रुघ्नस्यानुपदं पश्चाद्राजगिसम भूत् यद्यपि धातुरुपसर्गस्य घातकं निरर्क
विकं च माघे धातुलीनमुपसर्गमिति ९ आदिष्टेति मुनिभिरादिष्टकथितं वर्त्म मार्गो यस्य स तादृशो गच्छतस्तस्य संमध्ये वरो रथः शत्रुघ्नार
थपश्चैरथगामिभिर्विभौ कैः कैरिव वालखिल्यैर्मुनिविशेषैर्यथा सूर्य इव शीघ्रगामिनी निपातः १० तस्येति [illegible] यतो गच्छतः तस्य शत्रुघ्न
स्य मार्गवशात्संगाद्वाल्मीकीये तपोवने आश्रमे एका वसतिर्निशा वभूव कीदृशे रथस्वनेन शब्देनोत्कर्णा ऊर्ध्वश्रोत्रा मृगा यत्र [illegible] त॥
स्मिन् वसती रात्रिवेशमनो विश्रमः यत्नः इति हलीयुध ११ तमिति मुनिस्तपःप्रभावान्माहात्म्यात्सिद्धाभिः प्राप्ताभिर्विषयप्रतिपत्तिभिरुपभो
गा[illegible]दिसंभावनाभिः क्लांतान् श्रांतान् वाहनानि तुरगा यस्य तं शत्रुघ्नं पूजयामास तत्तुपत्तत् १२ तस्यामि — अंतर्वत्नी गर्भिणी स्वप्रजावती भ्रातृ ८
जाया सीता तस्यामेव यामिन्यां रात्रौ सुतौ तनयो असूत जनयामास काकाविव वितिर्भूमिः संपत्तौ समृद्धौ कोशदंडाविव अंतर्वत्नीति अंतर्व
त्न्यतिवत्तोर्नुक् अंतर्वत्नी गुर्विणी स्यात् प्रजावती भ्रातृजाये त्यभिधानचिंतामणिः १३ संतानेति भ्रातुः रामस्य संतानस्य पुत्रोत्पत्त्या प्रहृष्टवल
सोमनस्य गुप्तिस्तद्वत्प्रांजलिर्बद्धांजलिर्युक्तरथः सज्जनस्यंदनः सौमित्रिः शत्रुघ्नो मुनीनामंत्र्य पृष्ट्वा ययौ १४ सचेति शत्रुघ्नो मधोर्लवण
पितुरुग्रं मधूपघ्नं मथुरां प्राप्य कुंभीनस्याः [illegible] कुक्षिजः लवणः पुनः करं राजग्राहं भागमिव सत्वानां जीवानां राशिं समूहं सादाय गृहीत्वा
प्रस्थितः स मानतः [illegible] कालद्योतकौ चकारौ मधुरा तु मधुपघ्नमित्यभिधानचिंतामणिः १५ धूमेति धूमवद्धूम्रवर्णः वसामेदस्तस्य गंधो यस्मिन्
कीलाभ्रवः कपिलाः केशा यस्य स तथा क्रव्यादो रक्षसां गणैर्वृतः लवणः जंगमश्चितानिरिव प्रस्थितः पूर्वे [illegible] धूमेन धूम्र
वसागंधी ज्वालाएव [illegible] केशा यस्य स तादृशः क्रव्यादां पक्षिणां गणैः परिवृतः १६ अपेति लक्ष्मणानुजः शत्रुघ्नोऽपशूलं शूलरहितं लवणं ८
मासाद्य रुरोध [illegible] यतः रंध्रप्रहारिणां येते नां जयः संमुखीनाह स्वस्थितोयथा मुखसन् मुखस्य दर्शनः खः १७ तानीति [illegible]
[illegible] लवणो वाचा शत्रुघ्नमिति संतर्ज्य तस्य शत्रुघ्नस्य हंतुमिच्छया प्रोन्मुखं [illegible] मुस्तात्तस्य [illegible] मिवोत्पाटयामास [illegible] इति
किं अद्य मत्कुक्षेर् उदरस्य भोजनमायाति पर्याप्तं नासीत् संक्षुधो माल [illegible] भीतेन [illegible] धात्रा [illegible] दिष्ट्या [illegible] मुपपादित आनीतो
सीति १८ सौमित्रिरिति निशितैस्तीक्ष्णैः शत्रुघ्नस्य [illegible] वाणैः [illegible] मार्गे [illegible] कलीकृतः खंडितो [illegible] लवणस्य [illegible]

२ रवीतरुः सौमित्रेर्गोत्रं किं प्रापत प्रापेत्यर्थः किं तु त[illegible] तरुपुष्परजः परागः प्रापत् १९ निशान्तमिति रक्षो लवणः स्वस्य शूलस्य निशान्तं तीक्ष्णीक

रणस्य महोपलं तस्मै शत्रुघ्नाय प्रजिघाय प्राहिणोत् किमिति इव कुष्ठितं कृतं तस्य मुष्टिमिव प्रजिघाये तिहे खंडि[illegible] तिघलं २० ऐन्द्रमिति

ऐन्द्रो देवताऽस्येत्यैन्द्रमस्त्रमुपादाय गृहीत्वा शत्रुघ्नेन ताडितः स पाषाणः सिकतात्मा वालुकात्मा पि परमतिशयितां अणुतां सूक्ष्मतां प्रपेदे प्रा

प्तः २१ तमुपेतीति निशाचरो लवणो दक्षिणं दोर्दण्डं बाहुमुद्यम्योत्थाय तं शत्रुघ्नमुपाद्रवत् प्रत्यधावत् कं इव उत्पातपवनेन वातेन प्रेरित ए

कस्तालो यस्य स तादृशो गिरिरिव भुजबाहुप्रवेष्टो दोरित्यमरसिंहोक्तत्वाद्दोरिति नपुंसकत्वं चिंतितं न घेट्टुकारे नपुंसके प्यभिहितः

अपवादो बहस्तो यद्दक्षिणमिति पाठः २२ कार्ष्णेति शत्रोः शत्रुघ्नस्य कृत्सोदेवताऽस्येति कार्ष्णी लोह हस्तच्छिकारेण पवित्रिणा [illegible] वाणे

न भिन्ने विदीर्णे हृदयं यस्य स तथाभूतो पतत् स लवणो भुवः पृथिव्याः कंपमानिनाय आनीतवान् आश्रमवासिनां मुनीनां कंपं

च जेतारं निराकरोत् तस्मिन्मृते तथाभावात् कार्ष्णीशीशकलोहयोरिति यादवः २३ पयसामिति तस्य रक्षसो लवणस्योपरि वय

सां पक्षिणां पंक्तयः पेतुः पतन्ति स्म कियादीपकं २४ सहतीति विशेषणं ईरयतीति वीरः स शत्रुघ्नो लवणं प्रहत्य हत्वा इन्द्रजितो वधेन

शोभितो भ्रातुर्लक्ष्मणस्य सोदर्यं सोदरत्वं आत्मानं मेने सांप्रतं सोदर्यो स्मीत्यर्थः इन्द्रजित्तुल्यलवणवधात्सोदर इत्यर्थः २५ तस्येति

चरितार्थैः कृतकृत्यैर्मुनिभिः स्तूयमानस्य तस्य शत्रुघ्नस्य व्रीडया लज्जया वनतं नम्रं विक्रमेणोदग्रमुच्चं च शिरः शुशुभे नतं।

कथमुच्चमिति विरोधाभासः २६ उपेति पौरुषमेव भूषणं यस्य स तथा अर्थेषु निर्ममो निरभिलाषो मधुराकृतिर्यस्य स शत्रुघ्नः

कालिन्द्या यमुनाया उपकूलं तटे मथुराभिधानां पुरीं निर्ममे चकार २७ यतीति सौराज्येन प्रकाशाभिः प्रसिद्धाभिः पौराणां पुरवासिनां

विभूतिभिर्याम[illegible] पुरा भुशुभे [illegible] केवल गौरस्वामिबंधदेवमनं शास्त्री नगरं कृत्वेव निवेशिता स्थापिता अथ वा स्वर्गस्वामिबंधदेवमने सारा

घेयं तस्याहरणं कृत्वेव निवेशिताऽभवत् या स्वर्लोकसमानासेत्यर्थः आमिबंधदेवमनं शास्त्रीनगरमिति वा केचित् ःरनतत्रेति तत्रतस्यां पु

रि सौधगतो मंदिरारूढ श्री [illegible] क [illegible] वाका [illegible] लिनीं यमुनां पश्यन्स शत्रुघ्नो पि प्रियेप्रीतो भूत् कांमिव हेमभक्तिमयीं हिरण्मयप्रालाको

लंकृतां भूमेर्वेणीमिव प्रीता वितस्स कर्तारि २८ सखेति दशरथस्य सखा जनकस्य च मंत्रकृत् मंत्रोपदेष्टा वाल्मीकिरुभयप्रीता २

स्नेहान्मैथि[illegible]ल्या अपत्ये मैथिलेयौ संस्कारस्य तत्क्रमक्रारणसंस्कृतौ कृतवान् संपर्युपेतः करोतेर्भूषणे लुङ् इति सुडागमः। ३०। स इति कुशेन
लवेन गवादिलोम्नाचान्मृष्टे दूरीकृतो गर्भक्लेदरसो ययोस्तौ कविर्वाल्मीकिस्तयोः कुशलवयोरन्वयानाम्ना कुशलवावेव नामतः [illegible]कारं न तु स्वरू
पेन प्रधान्येश शब्दे लवे वा इत्यमरः कामतिरिच ताभिति मनुर्व्याख्याने लवशब्दो मेखलादिलोपवाची तिदधिणावर्त्तः लवस्तृणविशे[illegible]षस्तस्यार्थः ३१ सांगमि
ति च कारात्सर्वश्लोकात्मकं विस्तीर्णे चेत्तनुरूपाते कविस्तौ अंगैः सह वर्त्तते इति सांगं वेदमध्याप्य पाठयित्वा किंचिदीषदु[illegible]क्रांतं लंघितं शैशवं बाल्यं
ययोस्तौ कवीनां प्रथमपद्धतिं मार्गं स्वकृतिं रामायणं गापयामास गापयत् शिक्षा कल्पो व्याकरणं छंदो ज्योतिर्निरुक्तं षडिति षडंगानि। ३२ इतरोपीति। त्रेता
ग्नितेजसोऽग्नित्रयतुल्यतेजसो भरताद्या[illegible]स्त्रयोपीतरे तद्या[illegible]गात्तस्य रामस्य योगात् द्विपुत्रा रामसाहचर्यात्स्वपतिपत्नीषु पतिव्रतासु पत्नीषु द्वौ सूनू पु
त्रौ यस्य स द्विसूनुः द्विसूनुश्च द्विसूनुश्च द्विसूनुश्चेकशेषेण द्विसूनवः सुतयुक्ताश्च भूवन् ततयोगात तत्[illegible]ष्टेन भरतादिपरामर्शस्तस्माद्विशोकत्रि
त्तयोगाद्वोपागः तत्र शोभनयोगात् ३३ एवं जेरामेउत्सुकमुत्कंठितः शत्रुघ्नः शत्रून् घातिनि निगृहीतारि सुवाहो सुवाहुनाम निवहु श्रुते वहुश्रुत
नाम्नि च सूत्रोः पुत्रयोर्मधुराविदिशाभिधाने नगर्यौ निदधे चिक्षेप ३४ भूय इति यात्राति[illegible]क्रिययागोष्ठीकरणेन वा भूयः पुनरपि तपसो वाल्मीकेराश्रमं गो
मभूदिति हेतोः स शत्रुघ्नो वाल्मीकेराश्रमं नगादिति च कामं कीदृशमाश्रमं मैथिलीतनययोः कुशलवयोरुज्झितकर्णनेन निश्चला मृगा यत्र तादृशं ३५ व
शीति वशी जितेंद्रियः शत्रुघ्नोऽयोध्यां विवेश प्राविशत् कीदृशो लवणस्यारात्तस्य वधात्तोरणे नाग[illegible]रिकैः सादरं यथा स्यात्तथा दृष्टो दृष्टः कीदृशीर
थ्यायाः प्रतोल्याः तोरणादिसंस्कारेण शोभमानां ३६ स इति स शत्रुघ्नः सभामध्ये सभासत्[illegible]द्भिः सभ्यैरुपासितं सेवितं रामं ददर्श [illegible] कीदृशं सी
तायाः परित्यागात्सुवोऽसामान्यो साधारणः पतिस्तं ३७ तमिति अग्रजो रामः प्रणतेन मंत्रेलवणस्यांतकं शत्रुघ्नम[illegible]नंदत् प्रशशंस कः कंसमिव कालनेमेर्दैत्य
स्य वधात्प्रीतस्त्रैस्तुरापाडिंद्रः शार्ङ्गिणं विष्णुमिव तुरापाडिति सहतेः पिताच्छं[illegible]दसि क्विप् छांदसाभ्यामपि भाषायांत्र[illegible]णुं[illegible] व्यात इति दीरस्वामी ३८।
[illegible]येति [illegible] पदाह शादणतो जानपदो स इति रामस्तत्प्रवृत्तिं ३९ स शत्रुघ्नो राज्ञे रामाय वार्त्तां कुशलमाख्यदकथयत् संततिं कुश
लवोत्पत्तिं नाख्यत् कस्मात्कालेऽवसरे आख्यापयितो व्याख्यास्यतस्तस्य कवेर्वाल्मीकेः शासनान्निदेशात् आख्यादिति लुङि [illegible]ख्या

त्यादि॥ ३९ अथेति अथानंतरं जानपदाद्देशादागतो जानपदो विप्रो भूपते रामस्य द्वारि अंकशय्यास्थितमप्राप्तयौवनं बालं पुत्रं मृतं तार्य
चक्रे दारुदत् जानपदः इति तत्र आगतः तत्तेन नाम ॥ ४० ॥ रोदनप्रकारमाह सो चेति हे वसुधे भूमे त्वं शोचनीयासि शोकयोग्यासि या व
तीमद्दशरथोच्युत ... ता भ्रष्टा रामहस्तमनुप्राप्ता कष्टात्कष्टतरं गता इति रोदनस्वरूपोक्तिः ४१ श्रुत्वेति गोप्तारक्षको राघवो रामस्तस्य
ब्राह्मणस्य वचः शोकस्य हेतुं कारणं श्रुत्वा जिह्राय लज्जितो हि यतो ऽकालमवेक्ष्य त्वावो तन्नो मृत्युरिक्ष्वाकूणां पदं स्थानं नास्पृश
त् अतो लज्जा ४२ स इति स रामो मुहूर्तं सहस्वेति दुःखितं द्विजमाश्वास्य वैवस्वतस्यांतकस्य जिगीषया जेतुमिच्छया कुबेरस्येदं कौबे
रं विमानं पुष्पकं सस्मार स्मृ... तवान् ४३ आत्तेति । आत्तं गृहीतं शस्त्रं येन स रघूद्वहो रामो ॥ ४४ ॥ राजन्निति अपचारो अनाचारः प्र
वर्तते तमपचारमन्विष्य गवेषय ततः कृती कृतकृत्यो सि ४५ इतीति । इत्याप्तवचनाद्रामो वर्णानां विक्रियामनाचारं विनेष्यन्नेष्यका
मो रामः पत्रेण वाहनेन दिशः ११ तव भ्राम कीदृशेन वेगान्तिः केपः केतुध्वजो यस्य तेन पत्रं वाहनं यो रिसमरः ४६ अथेति । अथानं
तरं ऐक्ष्वाको रामः कंचिदंत ... कन्नामानं ददर्श कीदृशं धूमेनाभिताम्ररक्तेक्षणं यस्य सतं वृक्षस्य शाखायां लंबमानं तथाऽधोमुखं त
पस्यंतं तपश्चरंतं देहिनाय ... नहास्ति नायिनस्यादिने त्वा कशब्दो निपातः ॥ ४७ ॥ पृष्टेति । राज्ञा रामेण नाम च कर्म चान्वयो वंशः पृष्टता
न्पृष्टो धूमपः पिबतीति धूमपः सुरपदार्थी निसर्गोपिनला विप्रः शंबुकं नाम अस्ं इमा मा त्मानमाचष्ट कथयत् ॥ ४८ ॥ तपसीति । नियंता प्रशास्ता रामः
शस्त्रमाददे जग्राह किं कृत्वा अस्य शूद्रस्य तपस्यनधिकारित्वादनाधिकारात्प्रजानां लोकानामघं घ्नं हे दुःखकारिणमतएव शीर्षच्छेदमह
तीति शीर्षच्छेद्यं तं परिच्छिद्य ज्ञात्वा ॥ ४९ ॥ स इति । स रामस्तस्य शूद्रस्य वक्त्रं कंठनालादपाहरत् दष्टोत्सीतू कीदृशं ज्योतिःकणैरग्निकणैर्द
ग्धं श्मश्रु यस्य तत् वक्त्रं किमिव हिमेन तुषारेण क्लिष्ट ... लिताः केशराण्यस्य तत्कंजमिव ॥ ५० ॥ कृतेति । राज्ञा रामेण स्वयं कृतो दंडो य
स्य स शूद्रः सतां साधूनां गतिं लेभे प्राप स्थित्या ... लीति नामाचारं लंघितुं शीलं यस्य तेन दुश्चरेण चरितपसापि राज्ञो निकृत दंडो स्ति हत्वा
पापानि मानवाः निर्मलाः स्वर्गमायांतीति श्रुतेः ॥ ५१ ॥ रघुनाथ इति मार्गे दृष्टितः त्रौ यैन महद्द्रोजस्तेजो यस्य तेनागस्त्येन रघुनाथो रा

३

मोनिजावासंयुयुजे संगतो भर्तु[illegible] किमेकमिवेंदुनाचंद्रेण समरत्का लमिवा।५२। कुंभेति। कुंभयोनिरगस्त्यस्तस्यैरामाय दिव्यपरिग्रहं सुयोग्यम
लंकारं मम्बर्णंद[illegible] पीतेन समुद्रेण पदात्मनः स्वस्याजिघ्रुक्ष्ये दत्तमूर्यपश्चात्तमितिमैथिल्याः सीतायाः कंठे निष्क्रियकारेण लिंगनवाहुरात मलंकारं
मणिं दधन् विभ्राणो रामः।५३। अन्विवर्तते निवृत्तरा[illegible]गमनात् पूर्वमेव परासुर्मृतो द्विजात्मजो विप्रपुत्रो निवर्तते जीवति स्म।५४। तस्येति। पुत्रेण
समागतो मिलितो द्विजो वैवस्वतात् यमादपि त्रातुरर्दितुस्तस्य रामस्य शंबौ[illegible]दितां अथ मोक्ताकनिंदां स्तुत्या निवर्तयामास दूरीचकार।५५। [illegible]
तमिति। अध्वरायज्ञार्थं मुक्तास्वंतरामेरक्षांसि केपयोनरे स्वरारा जानश्चोपायनैरभ्यवर्षन् ववृषुः अंभोभिः पानीयैः मेघाः सस्यं धान्यमिव
उपायनमुपग्राह्यमित्यमरः। अध्वरायेति क्रियायोगे चतुर्थी।५६। दिश इति। निमंत्रिताः स[illegible] माहूता महर्षयो मुनयो भौमानि भुवि भवानि ज्यो
तिर्मयानि दिव्यानि [illegible] च धिष्ण्यानि गृहाणि त्यक्त्वा दिग्भ्यः सकाशादभिजग्मुः समागताः धिष्ण्यमाको निवसनमित्यमरः।५७। उपशल्येति। उप
शल्ये नगरीसमीपे उपविष्टैस्तैर्मुन्यादिभिः चत्वारि द्वाराण्येव मुखानि यस्याः सा योध्या सद्यः सृष्टा लोकाययासापेतामही वेधसीतनुरिव
बभौ रुरुचे। ग्रामांतमुपशल्यं स्यात् इत्यमरः ग्रामशब्देन नगरोपलक्षणार्थं यथा ग्रामस्य करेण भस्यतः त्यादिवत् मुखीति स्त्रीयोपसर्जनादिति
ङीष्।५८। श्लाघ्य इति। वैदेह्याः सीतायाः स्त्यागोपि श्लाघ्योऽभूदिति शेषः। यतोहेतोः प्राग्वंशे जनप्रदेशे वासिनः स्थितस्य न विद्यते न्यायाया
यस्य तस्यानन्यजानेः से व सीता हिरण्मयी स्वर्णरूपा जाया सीता अस्त्रीकस्य यज्ञायोगपत्वेपि यज्ञायां तरं नां गीषकीरेस्य यें। प्राग्वंशः प्राग्
घविर्गेहादित्यमरः जायाजानिः।५९। विधेरिति। विधेः क्रियाया अधिकः सं भार[illegible]उपकरणं यत्र ता हशा मखो यज्ञः प्रवर्तते स्म। तैः यत्र
यज्ञे क्रियाया विघ्नाविघ्नहेतवो राक्षसा एव रक्षितारः काश्यसन् क्रियाविघ्नाः कार्यकारणयोरभेदोपचारादाघातमिति वत्।६०। अथे
ति। अथानंतरं गुरुणा वाल्मीकिना चोदितौ प्रेरितौ मैथिल्या अपत्ये कुशलवावि[illegible]तस्तस्तौ रामायणं जगतुः गीतवंतौ कीदृशं प्राचेत
सो वाल्मीकेरुपज्ञा आद्यं ज्ञानं यत्र तत् उपज्ञा ज्ञानमाद्यं स्यादित्यमरः उपज्ञोपक्रमं तदाद्याचिख्यासायामिति नपुंसकत्वात्।६१। वृत्तमिति। रा
मस्य वृत्तं चरितं वाल्मीकेः कृतिः काव्यं किन्नरवत् स्वरो ययोस्तौ कुशलवौ एवमुपस्थितौ येन कारणेन अथ एव तौ लोकानां मनोहर्तुं नालमा

४

समर्थौ तौ कुशलवौ स्यातां भवेतां तत् किं कारणं। ध्यकंपइति। सानुजः सभ्रातृको रामस्तयोः कुशलवयोः रूपञ्च आकारो गीते च गाने माधुर्यं दर्शनीयत्वं पश्यन्
कुतूहलाच्छुश्रावावास्र(?)णोत् कीदृशं माधुर्यं तद्रूपादि जानंतीति तज्ज्ञास्तैर्निवेदितं कथितमित्यर्थः। ६३। तज्जीतेति। तयोर्गीतं प्रवीणैकाग्रदत्तेति
त्ताऽस्फ्रुणियस्याः संसत्सभावभौरे जे केव प्रातर्हिमनिर्वाणी तुषारकणप्राविणी निर्वाता वायुरहिता वनस्थलीव। ६४। [illegible] वयमित्तिा सा ज
नता जनेन सम[illegible]हस्तयोः कुशल[illegible]वयोर्विल्वे नवयसा वृणचारिवेषेण रामस्य तत्तीयं वयो राजानुरूपकल्पश्च तयोर्वनं जटावल्कलधारि
त्वैवैवं विसंवादि भिन्नसादृश्यं पश्यता वि[illegible]स्मयो नाश्चर्येण स्वस्तिवतवीत्तायत्त्वे विलंत्वो धेत्यभिधानचिंतामणिः। ६५। उभयोरिति। लोक उभयो
स्तयोर्द्वयोर्गीर्वाणगुणेन तथा विस्मितो नाभूत् यथा नृपते रामस्य श्रीतिदाने सुवर्णसादत्यागे सुवीतस्पृहतया दानशौंडत्वेन विस्मितो भूत्
६६। गेयमिति। युवाभ्यां गेये केन विनीतौ दर्शितौ वामिति पदं कंदेशस्य यो गोयथा क्रूरमहसकेतुरिति मुद्रावत् इति केचित् तन्न एतद्द्वयत्वस्याभावात्
कस्य च कवेरयं कृतिः रतिराज्ञा रामेण स्वयं पृष्टौ तौ कुशलवौ वाल्मीकिमसंसतामनादिष्टं वां युवयोर्मवश्यमिति हस्ततदा तयोस्तु वयो
संबंधिनः चोरिति केचिद्व्याख्याते वा च चक्षिरे वां युवयोर्मध्ये कस्य तस्य षष्ठी चतुर्थी द्वितीयासु वा मातापितृभक्तौ नां व्यस्कमतिदेशज्ञाप
कोद्व्यञ्जाषितामिदेशः रत्यर्गेये न विनीतिरित्वर्मितिपामेयुक्तश्रतिदद्वि[illegible]णावर्त्तः व्यमितरतिच विस्तरक्रामता। ६६। अपेतिअथानंत
रं स वरः जोसानुजो रामः प्रचेतसं वाल्मीकिमुपेयिवानभ्यातः आत्मनः देहं दूरीकृत्य वर्जयकास्मैमुनये राज्यमभेदयद्देहं वर्जयित्वाचा
स्मैमुनये राज्यं निवेदयत् देहव्यतिरिक्तं समर्पयामासेत्यर्थः। ६७। सद्गतिा सुगुणिाकृं रूपालुः समुनिस्तो मैथिल्याः अपत्येत वात्मजौ तव एतौ कुश
लवौ स्यातां विदित्वा कथयित्वा रामस्य सीतायाः परिग्रहं स्वीकारं वव्रे याचतां। ६८। तातेति। भो तात वाल्मीके कल्याणवेधधर्मीस्माकं प्रत्यक्षं जातवेद
सि वह्नौ सुव्रता निर्मला किं त्वत्र त्वत्प्रजाः रक्षसो रावणस्य दौरात्म्याद् दुराचारात् तां सीतां न श्रद्दधुर्न वि[illegible]श्वसुः। ६९। ताइति। मैथिली सीता स्व
चारित्रं निजशीलं सुशुद्धिं प्रजाः तां प्रजाः प्रत्याययतु ततोनंतरं पुत्रवतीं सा पत्या मे नो नान्यादायज्ञां भवता देशात् प्रतिपत्स्विस्वीकरिष्यामि। ७०। इती
ति राज्ञा रामेण तिप्रतिश्रुते अंगीकृते सति मुनिर्वाल्मीकिः शिष्यैः सीतामानाययामास [illegible] सप्रापित नृकैः कामिवनियमैः शो[illegible]चसंतोषादिभिः स्वाभिल

षिताघ्रीसिद्धिमिव।७१।अ[illegible]न्येद्युरिति।अथानंतरं काकुत्स्थो रामोऽन्येद्युरन्यस्मिन्दिने पुरौकसः पौरान्सन्निपात्य मेलयित्वा प्रस्तुत इति प्रत्यये इति कृत कार्यिक।
रणाय कविं वाल्मीकिमाह्वापयामास कारयति स्म।७२।स्वरेति।मुनिर्वाल्मीकिः पुत्राभ्यामुपलक्षितया सीतया सह रामम् उपस्थितः स्वराणामुदात्तादीनां सं-
स्कारैः साधु त्वं न च्युतकं यावत्वेदर्चिमुद्दीप्तिरविमिव।७३।काषायेति।सा सीता सा तेनानिर्विकारे एव पुष्प अमुद्रेत्यनुमीयतानुमिता जनेरिति शेषः कीदृशे-
न काषायेन रक्तं काषायं वासस्तेन प[illegible]रिवीतमाच्छादितं तेन तथा स्वस्य पादयो रर्पिते च चक्षुषी यस्यास्तेन काषायमिति तेन रक्तं रागादित्यण्।७४।जनइति।सर्वे
जना ऊर्ध्वीमुखा अधोमुखास्तस्थुः स्थिताः कीदृशा जनास्तस्याः सीतायाः अवलोकस्य पंथास्तस्मात्प्रतिसंहृते संकुचिते चक्षुषी यैस्ते जनाः कत्वफलिताः शा-
लयो व्रीहय इ[illegible]ति।७५।तामिति।मुनिस्तां सीतां इत्यसादिशिद्दायति स्म इति किं मा वत्से पुत्रि भर्तू रामस्य दृष्टविषये पुरस्तात्स्वय वृत्ते आचारे लोकं निःसंदेहं
कुरु कीदृशो मुनिः आस्थितः स्वीकृतो विष्टरः पीठं येन स तथा आसीदिति शमिलेडिति सस्य हस्तन्यां द्वैत इति तकारः।७६।अथेति।अथानंतरं सीता वा-
ल्मीकिः शिष्यैणेव जितं दत्तं पुण्यं पवित्रं पयो जलं आचम्य सत्यं सप्रथरूपं सरस्वती वाचमुदीरयामास वोचत्।७७।वाङ्मनइति कर्याम्मे मम वाचा मनसा।
कर्मणा पत्यौ समे त्रिविधो व्यभिचारो नास्ति तथा भो विश्वंभरे वसुधे देवि विमामंतर्धातुमाच्छादयितुमर्हसि।७८।एवमिति।साध्व्या पतिव्रतया तया।
सीतया एवमुक्ते सद्योमुर्वीरं धात् छिद्रात् शतह्रदाया विद्युतः संविधि सातहृदं ज्योतिः स्विन्नभमामेड[illegible]लं द्युटदमुस्या [illegible]दुस्थितं संपा[illegible] शतह्रदाह्रादिनी
त्यमरः।७९।तत्रेति।तत्र सभायां वसुंधरा साक्षात्प्रकटीबभूव कीदृशी नागस्य शेषस्य फणाभिरुत्क्षिप्ते सिंहासने निषा[illegible]दिन्नुपविष्टा समुद्र एव वस-
नं यस्याः सा।८०।सेति।सा वसुंधरा भर्तरि रामे प्रहिते प्रेरिते दृष्ट्येया [illegible]सातां सीतामंकमारोप्य मामेति व्याहरं स्यमिदधाना एवं तस्मिन्नूरामे पातालमभ्यगा
त्।गतातस्मिन्निति बद्धंधानादर इति स[illegible]त्तमीं।रसायामितिधन्विनो धनुर्धरस्य रामस्य परसीयां भूमौ विषये संरंभो कोपं[illegible]गुरुर्वाल्मीकिः शमयामा
स न्यवर्तयत्कीदृशे विधे दैवस्य यद्बलं तस्य द्रष्टा किंभूतरामस्य सीतायाः प्रत्यर्पणं ऐषि एः इच्छतः रसा विश्वंभरा धरेत्यभिधानचिंतामणिः।८२।
ऋषीति।रामो यज्ञांते यागस्यांते ऋषी वाल्मीकिप्रमुखान् पुरस्कृता नृविसृज्य सुहृदश्च मित्राणि विभीषणादीन विसृज्य सीतागतं सीतास्थितं स्ने

५ हेतवस्तयोः तस्याः सीतायाः पुत्रयोर्निदधे निचिक्षेप ॥८४॥ युधेति । युधाजितो भरतमातुलस्य संदेशात् सिंधुकूलजं सिंधुनामकं देशं धनारंछितामजायेनताहशः सरामो

५ दृष्टः भावीय स्यताहशाय भरताय ददौ दत्तवान् ॥८५॥ भरत इति । तत्र देशे भरतो युधि रणे गंधर्वान् निर्जित्य केवलमातोद्यं वीणां ग्राहयामास ग्राहितवान् आयुधं शस्त्रेम

त्याजयत् जितवान् चतुर्विधमिदं वाद्यं वादित्रं आतोद्यं नाम कमित्यमरः ॥८६॥ स इति । स भरतः तक्षपुष्कराभिधानौ अभिषेकार्हौ राज्ययोग्यौ पुत्रौ तयोः तक्षपुष्करयोः आ

ह्वानामकयोः तयोः तक्षशिलापुष्करवत्योः तक्षपुष्करस्य पदेशः ॥८७॥ अंगदमिति । लक्ष्मणोपि अंगदं चंद्रकेतुं चात्मसंभवौ पुत्रौ रघुनाथस्य रामस्य शासनात्

ज्ञापकराद्यथो [illegible] पदेशविशेषपत्तस्येश्वरौ अमूरुतवान् ॥८८॥ इतीति । एवं रोपिताः प्रतिष्ठिताः पुत्रा यैस्ते रामादयो जनेश्वरा राजानो मे तल्लोकं प्रतिपन्ना नो दशरथ

लोकं प्राप्तानां जननीनां कौशल्यादीनां निवापान् श्राद्धादीन् क्रमाक्रमेण विदधुश्चक्रुः ॥८९॥ उपेतेति । अथानंतरं कालो यमो मुनिवेषेण राघवं श्रीराममुपेत्यागत्य योग

चावदत् रह एकांते संवादिनौ संवादं कुर्वतोः आवायोः यः पश्येत् दीक्षेत तं त्यजेदिति संकेतः ॥ वर्ण्यं यथा स्यात्तथेति ॥९०॥ तथेति । प्रतिपन्नास्ययां गीकृतवते तस्मै पाय

रामाय विष्टतःत्र कथितः आत्मा स्वरूपं येन स यमः त्वां च त्वोपरोवाच किमाह परमेष्ठिनः आदिश्य नारायणस्य शासनात् दादे [illegible] शाद्दिवमध्यास्वातिष्ठ ॥९१॥ विद्वानपीति

द्वारे तिष्ठंतीति द्वास्थात्तयोः रामयमयोः समयं संकेतं विद्वान् जानन्नपि लक्ष्मणः संकेतमभिनत् विभेद कीदृशः रामसंदर्शिनार्थिनो रामं द्रष्टुमिच्छो दुर्वाससः

शापाद्भीतः ॥९२॥ स इति । स लक्ष्मणः योगवित् शरय्वास्तीरं शरयूतीरं गत्वा देहत्यागेन पूर्वजन्मनो भ्रातृ रामस्य प्रतिज्ञामवितथां सत्यां चकार ॥९३॥ तस्मिन्निति । आ

मनः [illegible] चतुर्थो भागः चतुर्भागस्तस्मिन् लक्ष्मणे पाकुत्स्थे नाके स्वर्गमधितस्थुषि विति श्रिते सति राघवो रामः त्रयः पादाः अस्य सन्त्रिपाद् धर्म इव भुवि शिथिलेतस्थौ

स्थितः चतुर्भाग इति समासे ह्रस्वात्पीता त्रिभागशेषा रात्रिरित्यादि ॥ दिवत् त्रिपादिति संख्यासुपूर्वस्येत्यंतलोपः ॥९४॥ स इति । स रामः उदग्गुत्तरस्यां दिशि प्रतस्थे प्र

स्थितः रस्यु त्तरेण न्वयः किं कृत्वा कुशावत्यां [illegible] चोरिपववलं नागाहस्तिन तत्पाम कुशं सूरीणिर्वि कुशनामानं पुत्रे निवेश्य प्रति ष्ठाप्य सतां सत्कृतैः सुभाषितैः

जनितो श्रुणां लवो यस्मिन् तं लवं पुत्रं श्रावस्त्यां पुर्यां च निवेश्य ॥९५॥ उदगिति । कीदृशो रामः स्थिरा धीर्यस्य सः अग्रनयः पुरः सराय स्य सः सानुजो भरतशत्रुघ्नस

हितः गृहवर्जं गृहाणां वर्यस्या गोयस्मिन् कर्मणि तत्त्तथा यथाधिकरणे वहुव्री हिः पतिवासल्पा द्रष्टं स्नेहात् अयोध्यायासिताः नुगतः अनुगतः ॥९६॥ जगृहुरिति । तस्य राम

स्य वृत्तिज्ञाचित्ताभिज्ञा यवेदिनो हरयः कपयो राक्षसाः तस्य पदवी मार्गं जगृहुः गृहीतवंतः कीदृशाः कदंबमुकुलवत् स्थूलैः प्रजाश्रमिलौकिवाष्पैरभिवृष्टाः ५

सिक्ताः ॥९७॥ उपेतेति । उपस्थितं प्राप्तं विमानं येन तथा भक्तो अनुकंपिना दयावता तेन रामेण शरदस्त्वनुयायिनाम नुगच्छतां त्रिदिवस्य स्वर्गस्य सोपानानि अश्राणि कृतानि

६

यदिति। तत्र श। रस्त्वां मज्जतोजनानां संमर्दीय घस्माद्दवां प्रतारस्तत्तुल्योभूत् अतो हेतोर्मुवि तदाख्यया गोप्रतारनाम्ना पावनं१ विवे प्रपद्ये विख्यातमभू
त्।८०। स इति। स विभूरामो विबुधांशेषु सुग्रीवादिषु प्रपन्ना आत्ममूर्त्तयो स्वस्वरूपाणि ये तेषु सत्सु त्रिदशीभूतानां देवत्वं प्राप्तितानां पौराणां पुरवासिना
मर्थी स्वर्गोत्तरं द्वितीयं स्वर्गमकल्पयत् इचितवान्॥८१॥ निवर्त्येति। एवमुक्तप्रकारेण विधक्तेनो रामो मूर्त्तिधारी नारायणो दशमुखोऽवणोद्धृयंत छेदि
नाशकं सुराणां देवानां कार्यं निर्वर्त्य कृत्वा तत्पादद्विलोगिरौ चित्रकूटे लंकानाथं विभीषणं उत्तरे गिरौ हिमवति पवनतनयं हनूमंतं कीर्त्तेः स्तंभद्वयमिवो
मयं स्थापयित्वा सप्तानां लोकानां प्रतिष्ठाय स्थानादृशी स्वतनुं निजमूर्त्तिमविशत् आविशत्॥ मंदाक्रांतावृत्तं॥१००॥ इति श्रीमालान्वयसाधु श्रीधरर्ज्जनमल्ला
समभ्यर्थितखरतरगच्छीयनिजभावार्यपादपद्मोपजीवि:रवचेबुसरखतिवाचनाचार्य श्रीचारित्रवर्द्धनविरचितायां शिशुहितैषिण्यां पंचदशः सर्गः॥१५॥
॥ विष्णुर्नारायणःकृष्णो वैकुंठो विष्टरश्रवा॥ दा:दा॥ मोदरो हृषीके॥ ॥श॥ के॥ शवो माधव स्व॥ भू:१॥ दैत्यारि:पुंडरीकाक्ष। गोगोविंदो ग। रुडध्व
पीतांबर ॥ऽच्युत ॥ शार्ङ्गी विष्वक्सेन ॥ जनार्दन॥ उपेंद्र इंद्रावरज चक्रपाणि चतुर्भुज पद्मनाभ मधुरिपु वासुदेव त्रिविक्रमः॥ ८

रघुवंश१६सर्गटीकाप.८

॥श्रीः॥ अथेति। अथानंतरमितरे लवादयः सप्त रघुप्रवीरा रघुश्रेष्ठाः पुरोजन्मतयाग्रतो जन्मत्वेन गुणैः शौर्यादिभिश्च ज्येष्ठं कुशं रत्नविशेषं बंधपयोग्यं भज
न्त इति। तादृशं चक्रुरकार्षुः तत्र हेतुमाह। वंशरघूणां सुभ्रातुर्भावः सौभ्रात्रं कुलमनुसरतीति कुलानुसारि सौभ्रात्रमित्यण्। ण। त्रादित्वात् त्रिभुजेष्ठं निशास्तेतम
रः॥१॥ ते सेति। ते लवादयो अन्योन्यस्योपदेशानां यो विभागस्तस्य सीमानं व्यतीयुर्नातिचक्रमुः के कामिव समुद्रा वेलां मर्यादामिव कीदृशाः सेतुस्तटादिः।
वार्त्तीक्ष्णत्वादि गजिवंधो वने हस्तिग्रहणं आमिरवंध्यैः सफलैः कर्मभिः आदिपदेन खनिसीकारादिभिरनुष्ठिताः समग्राः। उक्तं च कामंदके कृषिर्वणिक्प
थो दुर्गं सेतुः कुंजरबंधनं खन्याकारवनादानं शून्यानां च निवेशनं अष्टवर्गमिमं साधुः स्वयं वृत्तो विवर्द्धयेत्॥ २॥ चतुरिति। दानं वित्तरणं प्रवृ
त्तिः प्रवर्त्तनं तत्रानुपारतानां निरंतरानां ते वंशं कुशादीनां चतुर्भुजस्य विष्णोरंशाः रामादयस्तत्र भवउत्पत्तिस्थानं यस्य स तादृशो वंशः भिन्नः पृथग्भूतः।
सन् चतुर्द्धा विससार प्रसृतः सुरद्विपानामैरावणादीनां सामयोनिः सामवेदाध्ययनकालोत्पन्नो वंश इवाप्रमप्पष्टधा स्यात् कीदृशानां सुरद्विपा
नां दानस्य मदोदकस्य प्रवृत्तिस्तेनोपारतानां उक्तं च हस्तामा परिगृह्य ब्रह्मा सामान्यगायत् गायतो ब्रह्मणस्ततो समुत्पेतुर्मतंगजा इति॥ ३॥
अथेति। अथानंतरं अर्द्धरात्रे शय्यागृहे शयनभवने प्रबुद्धः कुशः प्रवासस्य कलत्रं भार्या तस्य वेषोयस्यास्तां नागदृष्टां वनितां स्त्रियमपश्यत् प
श्यतिस्म कीदृशे स्तिमितानिष्कंपाः प्रदीपा यत्र सुप्ता जना यस्मिन्॥ ४॥ सेति। सा वनिता तस्य कुशस्य पुरतो ग्रे स्थित्वा जय महाराजेति स कामं सर्वं मंजे।
[illegible] लिं ववंध कीदृशस्य साधनं सतो सा धारणी पार्थिवर्द्धिः राज्यलक्ष्मीर्यस्य पुरुहूत इंद्रस्तस्येव भा दीप्तिरेवां शत्रूणां जेतुर्जयनशील।
स्य तथा बंधुमतो भ्रातृयुक्तस्य अनेन विशेषणेन तस्याः सूचनं परेषामिति कर्मणि षष्ठी॥ ५॥ तामिति। सविस्मयाः सा श्चर्यो दाशरथे राम[स्य त]नूजः स
कुशः स्त्री दृष्टेन विशिष्टमुक्तं तल्पं शय्या[...] येन तादृशः सन् तां स्त्रियं प्रोवाच जगाद कीदृशोऽनपोढमनुद्घाटितमपनीतवार्गलिकपाटनिष्कं।
भो वयस्य तत्तादृशमप्यगारं सदनं आदर्शस्यादर्पणस्य तलं छायामिव प्रतिष्टांत लंशय्यागृह[...]रेखित्यमरः अर्गलं द्वारपटलमिति वैजयंती कि
मस्य धादित्याहाह्यालब्धेति। सा वरलोपि हितेपि कपाटे लब्धं प्राप्तमंतरमवकाशो यया सा तथाभूता त्वं योगप्रभावः परपुरप्रवेशादियोगशक्तिस्त
ते न वनल द्वेतेकथं नलदतत्स्याह अनिर्वृत्तानां दुःखितानां चाकारं विभाविय या मणालिनी हिमसंसर्गं विना मुपरागं विच्छायभावं धत्ते। गकात्व

मिति। भो शुभे कात्वं सुरीमानुषी वा कस्य परिग्रहस्त्वं अपवाते मां प्रत्यभ्यागमने कारणं किं वशिनां जितेन्द्रियाणां रघूणां मनः परस्त्रीभ्यः पराङ्मुखीवृ
त्तिर्यस्य तादृशं मत्वा ज्ञात्वा आचक्ष्व ब्रूहि।८। तमिति। सा वनिता तं कुशमब्रवीत् भो राजन् स्वपदं विहस्य स्थाने मुन्मुखेन तव गुरुणा पित्रा द्यां स्वर्गं
नीता भो राजन् पुरवासिनो यस्याः सा तादृशी या अयोध्या तस्याः पुरो नगर्याः अधिदेवतां अधिष्ठात्रीं सं प्रति वीतो नाथः स्वामी यस्याः तां विद्धि जानीहि नी। (
तयो रेतस्य सामर्थ्यात्समासः श्रितं स्वः गुरुणा मवद्यामिति पाठे त्वपरित्यागे दोषाभावोक्तिः।९। वस्वौकेति। साहं सो राजन् येन सुन्दर प्रभावेन वक्तुः स्थिर
उत्सवो यस्याः स्तया विभूत्या वस्वौकसारां धनदनगरीमभिभूयातिरस्कृत्य समग्राः संपूर्णाः शक्तयः प्रभावादयो यस्मिन् सूर्यवंशोद्भवे त्वयि वि
द्यमाने सति करुणाशोच्यामवस्थां प्रपन्ना अधिगतास्मि पुरी। वस्वौकसारास्य विमानं पुष्पकोस्त्रियामिति यादवः वसूनामोकस्य गृहस्य।
वसारो यस्यां तामिति। अत्रौकशब्दाघ जंतत्वात् डोको निवाश आकाशे स्वमभिधानचिंतामणिः।१०। विशीर्णेति। प्रभुणा स्वामिना विना
विशीर्णा नितल्पा अन्पट्टालिका यस्य स तादृशः तथा पर्यस्ताः पतिताः प्राकारा यस्य स तथा मे गृहाणां सन्निवेशः गृहसन्निवेशः अस्ताच
ले निमग्नः सूर्यो यत्र तथा चंडवातेन भिन्ना मेघा यत्र तादृशं दिनं तं विडंबयत्यनुकरोतीति आरम्य सोच्यावस्थास्तु चेत्।११। निशास्विति (
ति। भो राजन् सराजपथो मार्गो न दन्नो मुखेभ्यो विगता उल्का न दन्मुखोल्कास्ताभिः विचितमन्विष्टमामिषं मांसं याभिस्ताभिः शृगालीभिः वाह
ते न गम्यते सेव्यते कः यो राजमार्गो निशासु रजनीषु आसवं तिसन्निवेति कलानि गंभीराणि नूपुराणि यासां तासामभिसारिकाणां संकेतगामिनीनां
रमणीनां संचरः संचरणयोग्यो भूत् तवहृश्यैरादिको धात्वंतरो वामंजुलमंगुलीनस्वाप्रमदायेन मार्गेण संचेरुस्तत्रोल्कामुखानां शृगा
लीनां संचारो भवत्येव श्लोकः।१२। आस्फालितमिति। दीर्घिकासु वापीषु वारि विहारसमये यदंभः प्रमदानां स्त्रीणां कराग्रैर्हस्ताग्रैरा (
स्फालितं सत् मृदंगवद्धीरो यो सौ ध्वनिस्तमन्वगात् अनुयाति स्म तदंभः पानीयमिदानीं वन्यैर्वनोद्भवैर्महिषैः शृंगैराहतं ताडितं क्रोशति
श्रवणकटु शब्दं तनुतेऽस्मरथः जलक्रीडाविलासमुत्सन्न प्रमदानां करकिशलय वार्यमाणस्य जलस्य वन्यमहिषविषाणशोभेयुक्त एव श्लोकः।१४।द

१

ते॰ शय्या इति। भोराजन् क्रीडामयूरा वनवह्निना लं मयूरत्वं प्राप्ताः कीदृशाः यष्टिनिवासभंगात् वृक्षेषु शेरते वृक्षेशयाः मृदंगानां शब्दस्यापगमो नाश
स्तस्माद् दलास्याः नृत्यरहिताः तथा दवो वनवह्निस्तस्योल्कया ज्वालया हतानि दग्धानि शेषाणि बर्हाणि पिच्छानि येषां ते मयूरो बर्हिणो बर्हीत
मरः दवो दावो वनवह्निरित्यभिधानचिंतामणिः।१४। सोपानेति। येषु सोपानमार्गेषु रामाः सुंदर्यः सरागान् लाक्षारागयुक्तान् चरणान् निक्षिप्तव
त्योऽद्य निपतंते षु व्याघ्रैः रक्तेन रुधिरेण लिप्तं पदं निधीयते निक्षिप्यते कीदृशैः सद्योहतान्यंकवो मृगविशेषा यैस्तैः मेममते न वृद्धनोक्ताह
इमसा रुरुन्यंकुरंकुशंबररौहिषा इत्यमरः।१५। चित्रेति। पद्मवनात् कमलखंडादवतीर्णाः करेणुभिर्हस्तिनीभिर्दत्तो मृणालबिसखंडो यै
र्यस्ते चित्रद्विपा लिखितहस्तिनो नखाग्रैरंकुशाकारैस्तदाघातेन विभिन्ना विदारिताः कुंभा यत्र तादृशं संरब्धस्य क्रुद्धस्य सिंहस्य प्रहतं प्रहा
रं वहंति।१६। स्तंभेष्विति। स्तंभेषु योषितां प्रतियातनाः प्रतिकृतयस्तासां फणिभिर्विमुक्ता निर्मोकपट्टाः संयोगात्स्तनोत्तरीयाणि भवं
ति कीदृशानां उत्क्रांतेन नष्टेन वर्णानां रक्तहरितसितादीनां क्रमेण विन्यासेन धूसराणां धूसरवर्णानां समोकं चुकनिर्मोकावित्यमरः।
१७। कालेति। कालांतरेण श्यामा सुधा येषां तेषु तथ्येतस्ततः सर्वत्र रूढास्तृणांकुरा येषु तेषु हर्म्येषु धनिनां गृहेषु मुक्ताफलगु
णशुद्धिर्येषां त एव चंद्रपादाः किरणा न मूर्छितेन वर्द्धितेन एवैतेन नयेषामभिनवसुधेषु वर्द्धंते इति सूचितं हर्म्यं तु धनिनां गृहमित्यभि
धानचिंतामणिः।१८। आवर्ज्येति। यासामुद्यानलतानां विलासिनीभिः स्त्रीभिः शाखाः सदयं सकृपमावर्ज्यानम्य पुष्पाण्युपात्तानि त्रोटिता
नि मदीयास्ता उद्यानलता वन्यैः पुलिंदैः शबरैः सहवानरैः क्लिश्यंते बध्यंते सहार्थे इवशाष्टः।१९। रात्राविति। गवाक्षा वातायनानि क्रमी
णां मर्कटलूतादीनां तंतुजालैः सूत्रजालैस्तिरस्क्रियंते आच्छाद्यंते कीदृशाः रात्रावपि अनाविःकृता अप्रकटिता दीपानां भासो दीप्त
यो येषु ते तथा दिवापि कांतानां स्त्रीणां मुखश्रीभिः कांतिभिर्वियुक्ता रहिता विच्छिन्ना गतो धूमस्य प्रसरो येभ्यस्ते विशेषणत्रयेण बाधा।
२०। वलीति। ईदृशानि शरयूजलानि दृष्ट्वा हे दूये दुःखिता भवामि कीदृशानि वलिक्रियाभिः स्नजाभिर्वर्जितानि रहितानि सैकतानि

भंगो

२

"स्नानीयं सुंदरीणामंगरागादि तत्संसर्गमवाप्नुवंत्यलमानानिलोकाक्रमणभावात्तडपांते तीरे वानीरालंबितसानां वनानि येषु तानि तथा"

येषां तानि तथा न्यानि पौरेपवनाभावात् दूयेऽतिकमेकर्त्तरि ॥२१॥ तदिति तत्तस्मात्कारणादिमां वसतिं कुशा वतीं विसृज्य
मुक्त्वा मां कुलराजधानीमयोध्यामभुपेतुं प्राप्तुमर्हसि योग्योसि यथा ते गुरुः पिता कारणात् रावणादिवधप्रयोजनान्मानुषीं तनुं मूर्त्तिं
हित्वा परित्यज्य परमात्ममूर्त्तिमादिनारायणीं मूर्त्तिं लेभे ॥२२॥ तथेति ॥ रघूणां प्रवरः श्रेष्ठः कुशस्तस्याः पुर्याः अयोध्यायाः प्रणयं प्रार्थनां त
थास्त्विति प्रत्यगृहीदंगीचक्रे अभिव्यक्तः प्रकटो मुखप्रसादो यस्याः सा पूर्नगर्ययोध्यापि शरीरबंधेन तिरोबभूव मानवरूपं विहाय देवं रूप
मग्रहीदिति अदृष्टा बभूवेत्यर्थः ॥२३॥ तदिति नृपतिः कुशः प्रातः संसदि सभायां द्विजेभ्यो ब्राह्मणेभ्यस्तदद्भुतमाश्चर्यरूपं रात्रिवृत्तं शशं
साकथयत्तेद्विजाः कुलराजधान्या अयोध्यायाः साक्षात् स्वयंवृतेण पतित्वे वृतमंगीकृतमेनं कुशं श्रुत्वाऽभ्यनंदन् प्रशस्तवन्तः ॥२४॥
कुशावतीमिति ॥ सावरोधः सभार्यः स कुशः कुशावतीं श्रोत्रियसात्कृत्वा ब्राह्मणेभ्यो दत्वाऽभ्रवृंदैर्मेघसमूहैर्वायुर्यात्ऽस्वसैन्यैरनुद्रु
तैरनुगतोऽनुकूलेऽहनि शुद्धदिनेऽयोध्याभिमुखः प्रतस्थे प्रस्थितः कुशावतीमिति सारादित्वाद्दीर्घः ॥२५॥ सेति सा सेना तस्य नृपस्य प्रया
णे जंगमराजधानी संचारिणी पुरी भवत् कीदृशी केतनानां ध्वजानां माला एवोपवनं यस्याः सा तथा बृहद्भिर्गुल्मिनी गैर्गजैर्विहारशै
लैः क्रीडागिरिभिरनुगतेव रथा एव दारागृहा यस्यां सा सारद्दा ॥ तेनेति ॥ तेन राज्ञा कुशेन पूर्वीयानिवासभूमिरयोध्यां प्रतिप्रस्थापितो ब
लौघः सैन्यसमूहः उज्जतेनोदितेन शशिनेंदुना वेलां नीयमान उदन्वानिव समुद्र इव बभौ भातिस्म कीदृशेन आतपत्रेणामलमंडनं यस्य तेन ॥
२७ तस्येति प्रयातस्य प्रचलितस्य तस्य राज्ञो वरूथिनीनां सेनानां पीडां सोढुमपर्याप्तवती वसुंधरा भूः रजश्छलेन धूलि
व्याजेन द्वितीयं विष्णुपदं नभोऽध्यारुरोहेव गतवतीव वरूथिनीनामिति कर्तरि षष्ठी यो बाधां न सहते सो वश्यमेवान्यत्र व्रजति ॥२८॥ उद्येति
तस्य नृपस्य सा सेना यत्र यत्र देशे दृष्टा तत्रैव सामग्र्यमतिं संपूर्णां बुद्धिं चकार कीदृशी पश्चात् गमनाय गमनार्थमुद्यम्यमानोद्योगं कुर्वाणा
तथा पुरान्निवेशे पथि वर्जयंती ॥ २९ ॥ तस्येति ॥ पथि तस्य नेतुर्भूपतेर्द्विपानां मदवारिसेकाद्दानजलसिंचनाद्रेणुः पंकत्वं कर्दमत्वं प्र

पदेशान्नः पंकोपि तुरंगमाणां खुराभिघातैस्ताडनेन तस्मादुत्थितस्त्वमियायप्रातः ॥२८॥ मार्गमिति ॥ विंध्ये भुवि विंध्याद्रिसंबंधिप्रकटकांतरे भुसानु
भुमार्गं बिलीमार्गमभिलबं[illegible]ती बहुधा नानाप्रकारेण विभिन्नां दृष्टवान् भूतां महान्विरावः शब्दो यस्याः सा तथाभूतां सेनां रेवेव नर्म
देव गुहामुखानिव भ्रमप्रतिश्रुत् प्रतिशब्दो येषु तादृशानि च कारस्त्रीप्रतिश्रुत्प्रतिध्वान इत्यम[र]ः रेवा तु नर्मदा सोमोद्भवा मे
कलकन्यकेत्यमरः ॥२९॥ सइति ॥ सप्रभुर्विंध्यमलंघदतिचक्राम कीदृशः धातुमदेन गैरिका[दि]नारुणायानां रथानां ने
मिर्यस्य सः प्रयाणध्वनिभिः कलकलैर्मिश्रितानि तूर्याणि यस्य सः ॥ तथा पुलिंदैः शवरैरुपपादितान्याहृतानि उपायनानि पश्य
न् इति तेषां प्रीत्यर्थं दर्शनेन नतु ग्रहणेन मितुदारत्वात्कानिरपि दृष्टधातृत्वात् तूर्यध्वनिनिर्जितनादत्वाच्च विंध्यपर्वतं धिकृतचक्रे
इतिध्यायार्थः ॥ प्रायेण माघेप्येवंविधोक्तिः दूरे भवज्जो जवलस्य गच्छतः पुरां बहूनां पुरमाः ॥३०॥ तीर्थे इति ॥ आपगां जलवाहिनीं गं
गामुत्तीर्य तोऽस्य नृपस्य नभसः आकाशस्य लंघने लोलाः पताये बांते हंसाः अयत्नेन बालव्यजनानां बभूवुः चामरत्वं प्रापुः ॥३१॥ सइ
ति ॥ सनृपः कपिलमुनिना रोषाद्भस्मावशेषीकृतविग्रहाणां भस्मीकृतानां पूर्वजानां सगरपुत्राणां सुरालयप्राप्तिनिमित्तं स्वर्गसं
प्राप्तिनिमित्तं त्रिस्रोता गंगा तत्संबंधं भः पानीयं ववंदे नमश्चक्रे कीदृशं सेनोत्तरणवशान्नौकाभिर्लुलितं तुलितं ॥३२॥ इतीति
इत्युक्तप्रकारेण कैश्चित् कतिपयैरहोभिः दिवसैरध्वनो मार्गस्यांते गंतव्यदेशप्राप्तौ शरय्वाकूलं तटं समासाद्य प्राप्य वितता वि
स्तृता[illegible]रायज्ञाय बांते पांरघूणां राज्ञां वेदिप्रतिष्ठान् यज्ञविस्पान् शतशो यूपान् पश्यद् ददर्श ॥३३॥ आधूयेति ॥ कुसुमद्रुमा
णां पुष्पिततरूणां शाखा आधूय ईषत्कंपयित्वा शीतलान् सरयूतरंगान् स्पृष्ट्वा कुलराजधान्या उपवनांतवायुः [illegible]तं श्रांतसे
न्यं यस्य तं राजानं प्रत्युज्जगाम प्रत्युद्गतः ॥३४॥ अथेति ॥ अथ सेनांतरं वलीसः बलानि सेनाः तस्याः पुरः उपशल्ये नि[illegible]

कटे निवेशयामास नवेशा यत् कीदृशः [illegible] रिपुषु मग्नं शल्यं यस्य सः तथा पौराणां सखा पौरसखः कुलस्य ध्वजः ॥३५॥ तामिति ।
प्रभुणा राज्ञा नियुक्ताः शिल्पिसंघाः संभृतानि संचितानि साधनानि सुधादीनि यैस्ते तेषां भावस्तस्मात् तथागतां तां पुरीं पुन
र्नवीचक्रुर्निर्वीनं विदधुः मेघा ग्रीष्मे भसां विसर्गास्तैः कान्त्रिदाघेन ग्रीष्मेण ग्लपितां तप्तामुर्वीं भूमिमिव नवीनवीजप्ररोहस्पृक्तो
विदधाः ३६ तत इति । ततोऽनन्तरं स रघुप्रवीरः श्रेष्ठः कुशः पराध्यानि श्रेष्ठानि प्रतिमायुक्तानि गृहाणि यस्यास्तस्याः पुरः पुर्याः सप
र्यां हारांसपर्यां पूजां उपोषितैः कृतोपचारैः वास्तु गृहाहारं मस्तस्य विधानं करणं तत्र प्रवीणैः कृत्वा निवर्त्तयामास संपादितवा
न् वेश्म भर्त्तुरस्त्रियामिति मरः ।३७। तस्या इति । स राजा राजशब्दः उपपदं यस्य स तत्तादृशं निशांतं राजगृहं कामी विलासी ॥
कांताहृदयं चित्तमिव प्रविश्य तदीयैर्योग्यासंवधिभिरन्यैर्गृहैर्यथा हर्य्यपायोग्यमनुजी... विनोत्तलोकोनूसंभावयामास संमानि
तवान् ।३८। सेति सा ... नगरी मंदुरा वाजिशाला तन्निवासशीलैस्तुरंगैरश्वैस्तत्पाशाला... नामवधिस्तस्य स्तंभेषु गतैर्वद्धैर्नागैर्गजै
श्चहृत्वा सर्वीव दवेषु न ध्वानि ...रूपलानि यस्याः सा तादृशी नारीव वभासे कीदृशी विपणिः पण्यवीथिका तत्र स्थितानि पण्यानि क्रयवस्तूनि यस्यां सा
वाजिशाला तु मंदुरा इत्यमरः ।३९। वसन्निति । पुराणशोभां दशरथादिराज्ये या भुक्तां इह शीशोभामधिरोपितायां तस्यां रघुणां वसतौ च योध्यायां
स वसन्मैथिलेयः कुशो दिवौकसां ... मत्रे शक्राय स्पृहयां च भूव नाप्यलकायाः ईश्वराय धनदाय स्पृहयां बभूव एतेनेंद्र धनद तुल्यराजत्व
न्नगरी समानत्वमयोध्याया इति भावः स्पृहेरीप्सित इति संप्रदानत्वं ।४०। अथेति । अथानंतरं धर्मी... सीभ... का... लोऽस्य राज्ञः प्रियाणां वल्ल
भानामेतादृशं वेष... सुपादनं मिवागमात् कथंभूतं तैर्यतिर्मुक्तरीयं यत्र तथैवैकांतं ततो नियमेन पांडुवर्णयोः स्तनयोर्लंबोहारो यत्र तथा निः
श्वासेन मुखमारुतेन हार्यं चलनीयमंशुकं यत्र तत् ४१ अगस्त्येति अगस्त्यचिह्नं यस्य तस्मात् दक्षिणायनात् भास्वति सूर्ये सन्निवृत्ते समीपं

संवृत्ते व्याहृत्यागते सति उत्तरा दिक् भर्त्री गमनोत्पादितेनानंदेन तां शीतलां हिमाचलसंबंधिनीं हिमस्रुतिं तुषारस्रुतिं वाष्पदृष्टिमिव
ससर्ज तत्यक्तौ तुषारस्य विलयः स्यात् तत्रोत्प्रेक्षा दक्षिणस्यां सपत्नीं परित्यज्यादित्यो मदभ्यासमगादिति हर्षादुदक् ग्ध्रानंदाश्रुहर्षं हिमु
मोचेति भावः अगस्त्याद्दक्षिणस्यां निवसतीत्यगस्त्यचिह्नं त्वं दक्षिणायनस्य ४२ प्रवृत्त इति दिवसो ति मात्रमत्यर्थं वृद्धिं गतः स्तापोय
स्येति तादृशः क्षणदा च रात्रिरत्यर्थमेव तन्वी क्षीणा उभौ रात्रिदिवसौ विरोधक्रियया विभिन्नौ विभक्तौ सानुशयौ पश्चात्तापौ
जायापती स्त्रीपुंसौ विवस्ताय यथा प्रणयकलहवसतः पुमान् संतापवान् स्त्री च क्षीणा भवेत् तथा क्षपा दिवसो धर्मस्तावपस्
तामिति भावः रात्रिसंचारिणीनां राज्ञीनां ग्रीष्मे ल्पे नाडी कृत्वा क्षणदा वाः कृशात्वं ४३ दिन इति दिने दिने ऽहन्यहन्यधस्तात् क्षेत्रवा
लवंति सेवालयुक्तानि सोपानपर्वाणि सोपानमार्गाणि विभ्रं च तस्य जनत्य दीर्घिकाणां वापीनां मंदं भो स्तोयं नारीणां स्त्रीणां
नितंबद्वयसप्रमाणं बभूव जातं कीदृक् कुड्मलतदंडानि प्रत्यानि कमलानि यत्र तत् प्रमाणेद्वयसच्दघ्नमात्रं च ४४ नवेषिति
सायंभवाः सायंतनास्तासां मल्लिकाणां विचिकिलल्लतानां नवेषु नूतनेषु कुड्मलेषु प्रफुल्लेषु प्रत्येकं निक्षिप्तपदं येन तादृ
शः सशब्दो ध्वनियुक्तो भ्रमरो भृंग एषां कुड्मलानां संख्यामिव चकार व्या दधात् कीदृशेषु विजृंभणेन विकाशेनोर्जितः ।
गंधो येषां तेषु एतेन सौगंध्यलोभः सं यमल्लिकत्वे नयो अमृतं मौक्तिकैः अन्यो पियो गुणानां संख्यां करोति सो वशंयस्य
शब्दः स्यात् सायं चि रस्याहिंगत्यादिनातनर्दू मल्लिस्याद्विचकिलइत्यभिधानचिंतामणिः ४५ खेदेति । कामिनीनां क
र्णाच्युतमपि शिरीषपुष्पं सहसा शीघ्रं न पपात नापतत् हेतुमाह कीदृशं स्वेदेनाविद्धं संगतं यदा ऽऽननखक्षततदं क

णयोः किरणानां च सेवायायोस्तौ सदा सर्वदोदयेराज्याभ्युदये स्थितः सन्नृपः कुशः उदयाद्रौ स्थितः शशी चंद्र इव ५१ अथेति
ति अथानंतरं शारद्याश्रं मसि विहर्तुं क्रीडितुं वनितानां सखा वनितासखः तस्मा कुशः सेव्यां बभूव कीदृशे ऊर्मिषु कल्लोलेषु लो
लाश्चे चला उन्मदा उन्मत्ता राजहंसा यत्र तादृशे तथा रोधोलतानां तटोद्भवानां च प्रसूनानामुपान्ति वहति तथाभूते सुखयती
ति सुखः प्रचाद्य च ग्रीष्मे सुखं ॥ ग्रीष्मसुखसम्मिन्नृपराम इति चक्रधरस्य विलोभरे वप्रभावो यस्य सः कुशस्तां नदीं विगाह(
यितुं विलोडयितुं प्रचक्रमे आरेभे कीदृशीं तीरभूमौ तटभुवि विहिता उपकार्या पटगृहं यस्यास्तां निजमहिम्नो अनुरूपं यथा
स्यात्तथा कैः आनायिभिः धीवरविशेषैः अनायः पुंसि जालं स्यादित्यमरः ५३ सेति सा सरिन्नदी अंगनाभिः स्त्रीभिर्वि
विग्ना व्याकुला हंसा यस्यास्तादृश्यासीत् किंभूताभिः सोपानसर्पणाः सोपानपंक्तयस्तस्यावताराद्गमनेन केयूराणि घ
र्षितुं शीलं यासां ताभिः नूपुरक्षोभेण सहितानि पदानि यासां ताभिः भयहेतुत्वस्याविवक्षितत्वान्स्त्रीभिरिति न पंचमी ।
५४ परस्परेति नौसंश्रयान्नौकास्थान्नृपः कुशः पार्श्वगतास्समीपस्थां उपात्तं गृहीतं वालव्यजनं चामरं यया सा तां
किरातीं वामावेक्षणाचत् कीदृशः परस्परं यज्जलाक्षेपणं तत्र तत्पराणां तासां स्त्रीणां मज्जने योऽसावनुरागस्तद्दर्शनशीलः ।
स्त्रियां चामरवाहिन्यामित्युक्तत्वात्किरातीकथनेनैव चामरग्रहलाभेऽपि सर्वदैव योषितो वालव्यजनं न संपद्यते त(
स्मादुपात्तवालव्यजनामिति तिनपोनरुक्त्यं ५५ तस्येति मदीयैरवरोधैरंतःपुरजनैः शतशो विगाह्यमानोऽवलोड्यमा

ग्रवसानेन ४

पं

5

श्लिष्टं यस्य तथा भूते कपोले संश्लिष्टा संलग्ना भूयिष्ठा बह्व्यः शिखा यस्य तत् ४६ यंत्रेति रुद्धिमेत इमाः शिलाविशेषात् जा
तं जनादि पाषाणान् अपि शय्याधिष्ठायात ग्रीष्म ऋतुं विनुनिर्वाहितवंतः कीदृशान् [illegible] जलधाराभिरुपलक्षिता गृहा ज
लयंत्रगृहास्तेषु शिलाशिरेः शीते यंत्रे प्रवाहैः परीतान्व्या[illegible]प्तान् तथा मलयोद्भवस्य चंदनस्य रसेन धौतान् प्रक्षालितान् चतुर्भि
जलधाराभिर्जलयंत्रगृहं विदुः यंत्रो जलसेचारकमेदः ४७ स्नानेति वसंतान्तये न ग्रीष्मेण मंदवीर्यं यस्य स कामः स्म
रोऽगनानां स्त्रीणां केशेषु स्नाम धम्मिल्ले मे शापी कीदृशेषु स्नानेन नाडीच्युतांते बहुलीस्तेषु तथा धूपवासादनु पश्चात् छिन्नपुष्पस्ता
सायंतनी मल्लिका येषु संस्कृतकेशपाशदर्शनाद्विलासिनः समुल्लसितस्मरा [illegible] बभूवुरितार्थः ४८ अपिंजरे
ति अर्जुनस्यार्जुननाम्नस्तरोः पिंजरेखाः पिंगलवर्णा मंजरीरजः परागः बद्धरजः कणास्तस्मान् भावस्तं तं तस्मात् कारणा
त् गिरिशेन शंभुना कोपात् क्रोधात् मनोभवकामस्य देहं दग्ध्वापि खंडीकृत्वा ज्या प्रतं चारुरुचिरे जेकं केलिः ककुभोर्जुनः
रत्न[illegible]भिधानचिंतामणिः ४९ मनोज्ञेति मनोज्ञो मनोहरो गंधो यस्य तं सहकारभंगं तथा पुराणसीधुं पक्वेक्षुरसो तपत्नं मधुं
चेतः पानवपाटलं च पाटलपुष्पं कामिजने बवंधतासे [illegible] पादयता निदाघावधिना ग्रीष्मसमयेन सर्वे दोषाः संतापादयः
प्रमृष्टाः निरस्ताः पक्वेक्षुरसे सौ सीधुः पक्वरसैरिति यादवः ५० जनस्येति अगाढे प्रहर्षेते ऽस्मिन्समये ग्रीष्मे जनस्य
दोषविशेषकांतौ प्रीतावा स्तां कथं कोऽत्याहतापो दारिद्र्यदुःखमुपतापश्च तस्यापनोदे स्फोटने समाससमर्पीपाद यो ऽस्य र

नोऽएवः शरत्स्वा प्रवाहः साभ्रः समेघः संध्योदयस्व नैकं नानाविधं वर्णं पुष्णाति पश्य कीदृशैः गलितो जलसेको न्मष्टो ऽंग
रागो येषां तैः अप्रवरो धश्च ष्टेन अंतःपुरस्त्रियो लक्ष्यंते वाक्यार्थ एवं दशोकर्म ५५ विलुप्तमिति नावा लुलिताभिः स्निग्धाभि
रद्भिः पानीयैरंतःपुरसुंदरीणामंगनानां यदंजनं कज्जलं विलुप्तमपहृतं आसां विलोचनेषु मदनयो सौरागो रक्तिो
मा तत्से वशोभां वध्नतीभिः संपादयंतीभिरद्भिस्तदंजनं प्रति मुक्तं मत्सार्पितं यथा कज्जलेन [illegible]
[illegible]ः विलोचन[illegible]योः शोभा संपाद्यते तद्वत्पानीयैः संपादिहितेत्यर्थः रागो नुरागो मात्सर्यैः रक्तवर्णैः रजस्याप्रीति
केशवः ५६ एता इति एताऽबला गाढाम्भंग दानि ये षुता दृशे वीहुभिः क्लेशाउत्तरं यत्र तथा रागवशात् प्लवंते कीदृशाः
गुरुश्रोणि पयोधरत्वात् अतिभारनितंबस्तन[illegible]भावे नात्मानमुद्धर्तुमशक्नुवंत्यो ऽसमर्थाः चपला न्मीनान् मत्स्या
न्कूलयंति कर्णिकराणांमत्स्याकारात्तेभयस्तत्र मीना अव्याकुला भवंतीति भावः मीनो मीनमत्तीति प्रसिद्धेः अ
थवा सेवालमसृणे चपला मीना अवतंसान् शेवालमिति ज्ञात्वा ऽत्र मुग्धको ताः समानवर्णत्वात् एव वंचिताः वतंसः संवं
धिविवद्वयावारिविहारिणीनामिति वध्री ५८ आसामिति जलानामास्फालनेन तरणानामासां स्त्रीणां पयोधरो त्संग
पिंडु स्तनो त्पातिषु मुक्ताफल[illegible] स्पर्द्धिषु मुक्तो स्थूलेषु शीकरेषु स्वयं भिद्यते छिद्रुरोपि हारः शीर्णमाला विच्छिन्नो न सं
लक्ष्यते विदिमिदि छिदः कुरकुकर्मकर्त्तरि ५८ आवर्त्तेति अदूरवर्त्तीनि निकटवर्त्तीनि तानि वस्त्रानि विलासिनीनां

स्त्रीणां रूपस्य शरीरकांते रूपमानानिजा[illegible]ता निम्नता गंभीरा या नाभि कांतिस्तस्या आवर्त्तस्य जलभ्रमस्य शोभा आक्रांता भंगपःरु
लोलः स्तनानां द्वंद्वं चक्रवाकाः ६० नीरेति आसां स्त्रीणां वा यौवनमद्यास्तव्याह्यं श्रोत्रेषु कर्णेषु संमूर्च्छति वर्द्धते कीदृ।
शं रागयुक्तं तथा धारधरनादा वृत्कारित्रमदाकारताडितजल[illegible]रावश्रवणसमनंतरं हर्षवशात् उद्भूतः कलापिभ्यैः प्रस्निग्धा मधुराः केकाः
शब्दाये बांते तीरस्थली बर्हिभिर्मयूरैः अभिनंद्यमानं गीतिमनुगच्छतीति गीतानुगं कांताभिस्तथा मनोज्ञो नीरमध्ये नकं कणशब्दः
क्रियते येन तटस्थाः केकिनो घनगर्जितमता हर्षेषु वाचंते ६१ संदष्टेति अधीरसनाकलापः कांचीकलापः मौनं भजते तेन शब्दाये
ते तत्र कारणमाह जलेनाहरितारंध्रभागाः छिद्रप्रदेशाः तथा संदृष्टानि लग्नानि वस्त्राणि दुकूलानि येषु अबलानां स्त्रीणां नितंबेषु इं
दोः प्रकाशेन कांतोऽन्तरिता आच्छादिता उडूनि नक्षत्राणि तत्कल्पास्तत्तुल्या इत्यर्थः यद्यपि सामान्येन वस्त्रमभिधायि तथापि चंद्रप्रकाश
सादृश्यात् दुकूलं ज्ञेयं ६२ एतारिति सखीभिर्वदने मुखे सिक्तास्तरुण्यः प्रमदा वक्रेतरांगैर्जलमेकाच्छ्रलशिरवैरलकैः कुंकु
मादिचूर्णैः रूणान् वारिलवान् वमंति कीदृश्यः हर्षा[illegible] सखीजनं प्रति कराभ्यामुत्ताडिता वारिधारा[illegible] याभिस्ताः ६३ उद्धेति अंभसो वि
हारेणाकुलितोपि प्रमदानां मुखानां वेषो मनोज्ञ[illegible] एव कीदृशः उद्धं धाउ[illegible]द्भूत वंधा केशा यत्र सः विश्लेषी श्रवणांबुजे सीमुक्ताफलमयः।
कर्णवेष्टस्ताडंको यत्र च्युतानि अपत्रलेखा[illegible]तिलका[illegible] यत्र सततधार्तसौ मुखे यूनां कामोद्दीपकं जातमित्यर्थः ६४ सनूनि सराजानो रेवावि
मानं तस्मादवतीर्य प्रभुर्नारिभुता[illegible]भिः सह रेमे विक्रीड कीदृशो विलोलामाला यस्य सः स्कंधयोः लग्ना पद्मिनी यस्य करेणुभिर्हस्तिनीभिः
सह वनो द्विपेंद्रः करीव ६५ ततइति ततोनंतरं आलिंगनादृष्टेन रूपेणाधिगता मिलितास्ताः स्त्रियः सा[illegible]तिशयं स्पर्शं विरेजुः [illegible]मिरेकपामि

तादृक् मुक्तामौक्तिकमालाप्रागेव नयनाभिरामा नेत्रप्रियाः उन्मयूखं उज्ज्वलं दीप्तिमिंद्रनीलमणिं प्राप्य किमुत किं ६५ वर्णेति कांचनमयं यन्त्रकं
जलकेलियंत्रं तत्र स्थैर्य स्रोदितेः कुंकुमादिपानीयैः आयतांशः स्त्रियुः स्नेहात्तेरा जानमसिंचन् तथागतस्तया सिक्तोसौ भूपः सधातुनिबं
द्धो गैरिकादिनिबद्ध उक्तोऽद्रिराजो गिरिः श्री ६६ वातित तोयं भासेरे जे क्रीडानुयंत्रे शृंगो सक्तौ पर्वताग्र प्रस्रुतधारेति वैजयंती ६६ तेनेति तां
सरिद्वरां नदीश्रेष्ठां शरयूं विगाहमानेन नावरोधं प्रमदासखेनेतः प्रस्त्रीयुक्तेन तेन कुशेनाकाशगंगायां रतिः क्रीडा यस्य सोऽमरोमिः सुरां
गनाभिर्वृतो मरुत्वानिंद्रोऽनुजातोऽनुकृता लीला यस्य सतादृशोऽनुचक्रे ६७ यदिति रामोय दामरणं कुंभयोनेरगस्त्यादधिगम्य प्राप्य राज्ये
न सम्यं कुशाय दिदेश दत्तवान् क्रीडतस्तद्दसा जैत्राभरणं सलिले नीरे नष्टानः पातो यस्मिन् कर्मणि मम जोबुडनिस्स ६८ स्नात्वेति सदारस
स्त्रीको सौ कुशो यथाकामं यथेच्छं स्नात्वा तीरे तटे उपकार्यां परिष्कृहगतमात्र एव दिव्येन वलयेन जैत्राभरणेन शून्यं रहितमनुपयोगेन ष्टोनेप
प्पविधिर्यस्य तादृशं स्वकीयं बाहुं ददर्श स भूपतिः ६९ जयेति यतो यस्माद्धेतो जयश्रियो विजयलक्ष्म्याः संवरणं मतादकं यत्तत्स्व गुरुणा
पित्रा तदाभरणमामुक्तं पूर्वं स्वमिमुक्तं अतोऽस्याभरणस्य भ्रंशस्स कुशो नसेहे कीदृशः पितुस्तुल्य आभरणोयस्य सः तेन लोभाभावोक्तिः। ७० तत
इति ततोनंतरं सन्नृपोन घ्राः स्नातीति नदीस्नानकुशला स्तान्नानायिनो धीवरान् सर्वान् शुक्री घ्रं समाज्ञापयत् नदी माला डुतस्याभरणं न्वेष
णे वंध्यो निष्फलो श्रमो यै येषांते कैवर्त्ता अम्लानो धीरस्त्वानुमुखप्रसादो यस्य तं नृपमूचुः नदीस्नाति तिनिनदीष्णाः स्नातः कोशलः इति षत्व
७१ कृतइति मोदेव प्रयत्नः कृतो न चते आभरणं लब्धं तर्हि कु गतं इत्याह अंतर्हृदमगाधजलेहृदमध्ये वसतीति तादृशेन कुमुदेन नागेना
लोल्पाल्लो मात्स्यात्सिनीरे मग्नं तदाभरणं नूनं तमुपात्त गृहीतं नूनं तर्के अर्थं निश्चयस्त्वमरः ७२ ततइति कोपाद्रोषाद्विशेषेण लोहिते अरुणे
अक्षिणी यस्य तथा धनुर्द्धरो धन्वी नीरगत स्तटगामी तरस्वी बली सन्नृपो धनुरा ततज्यं संहितप्रत्यंचं कृत्वा भुजंगस्य कुमुदस्य नाशाय गा

स्या

तटानि

रुक्मतं गारुडास्त्रं समादत्ते ऽग्रहीत् ७३ तस्मिन्निति तस्मिन् गारुडास्त्रे संहितमात्रे ऽवरोधांसि निघ्नन् विदारयन् ह्रदो ऽवपाते गजग्रहणगर्त्ते मग्नो व
न्यः करीव परुषं कर्कशं ररावचुक्रोश कीदृशः क्षोभात् समाविद्धाश्च चलास्तरंगा एव हस्ता यस्य सः ततः पाशबद्ध इव पातालहस्तपर्येग तत्रोल्लीनमृणालदिनेति
वैजयंती ७४ तस्मादिति मथ्यमानात्तस्माद्ध्रतात् कन्यां पुरस्कृत्याग्रे कृत्वा भुजंगराजः कुमुदः सहसा ऽकस्मादुन्ममज्जोत्थितः यथा मथ्यमानात्समु
द्राल्लक्ष्म्या सार्द्धं सुरराजवृक्षः कल्पतरुः उन्ममज्जेति कीदृशाद् दुह्यत्तानुमितानकायत्त तस्मात् द्वयोरपि विशेषणं ७५ विभूषेति वि शांपतिर्नरप
तिर्विभूषणमेव प्रत्युपहारो बलिर्हस्ते यस्य तं तमुपस्थितमागतं कुमुदं वीक्ष्य सोपर्णमस्त्रं गारुडास्त्रं प्रतिसंजहार यतः सन्तः प्रह्वे पुनर्नम्रेषु अनिर्बंधा रु
षः रहिता रुट् कोपो येषां ते तादृशाः ७६ त्रैलोक्येति कुमुदः कुशं मानेनोन्नतेन मूर्ध्ना ऽभिवंद्य प्रणम्य एवमाबभाषे जगाद कीदृशं त्रैलोक्यनाथो विष्णुः प्रभव
उत्पत्तिस्थानं यस्य तं तथा प्रमाणवाहिर्विशेषणमं कुशं मूर्द्धाभिषिक्तं सार्वभौमं ७७ अवैमीति दशग्रीववधादिकार्यार्थमानुषस्य नररूपस्य विष्णो
रपरं सुतां त्वां तनुं त्वाम वैमि जाने सो ऽहमाराधनीयस्य तव ... तेऽहं स्य विधातं नाशं कथमाचरेयं कुर्वीय न कथंचन ७८ करेति सेयं बालात रिद्धाद्
कोशाज्ज्योतिर्नदं वामवहृदात्पततं त्वदीयं जैत्राभरणमालोक्य वीक्ष्य कुतूहलाद् दत्तजग्राह न तु लोभात् कीदृशी कराभिघातादुत्थितः ऊर्द्धतः कंदुक
स्याः सा कराभिघातादिति विशेषणेनो ऽध्यामाभरणदर्शनयोग्यता ७९ तदेतदिति तदेतदाभरणमंशलम्बेन बलवताभुजेन पुनर्योगमुपैतु लभेत कीदृशे
न ज्याघातविलं विनातथा ज्याघातलेखया स्थिरं लांछनं यस्य तेन ८० इमामिति मोन्ये ममयवीयसीं कनिष्ठां इमां स्वसारं कुमुद्वतीमनुमंतुमंगीकर्तुमर्ह
सीति नापितु योग्या भवसि कीदृशी ते तव पादयोः शुश्रूषया चिरायात्मापराधं नुदंती दूरी कुर्वाणा जघन्यजे यविष्ठः स्यात्कनिष्ठो ऽवरजानुजाः सयवी
या न्कनिष्ठो ऽत्यभिधान चिंतामणिः ८१ इतीति इति उक्तिप्रकारेण विवानु त्कवान् समेताभिलिता वेधवो यस्य सताहशः कुमुदो नागउपहृत्य समर्पितमा
भरणं यस्मै तं क्षितीशं नृपं कन्यामयेन पुत्रीरूपेण कुलभूषणेन वंशाभरणेन विधिमर्हतीति विधिवत् विध्यर्पसंयोजयामास कीदृशं नृपं भोः कुमुदभवान्

वे

८
४

श्लाघ्यः स्वजन इति भावितारं कथयंते अथवा विधिवदित्यस्य क्रियाविशेषणत्वान्निर्देश इति कश्चित् वसंततिलका वृत्तं ८० तस्या इति मनुजपति
ना राज्ञा कुशेन साहचर्याय सह धर्मचारणार्थं तस्याः कुमुद्वत्या हस्ते पाणौ गृहीते ताः शिखा ज्वाला यस्य तादृशस्य पावकस्याग्नेः पुरः पुरस्तात्तूर्ये गृही
ते सति दिशामंतान्व्याप्नुवानो व्यापनशीलः दिव्यस्तूर्यध्वनिः तात तदनु गंधोदयं सौरभ्याधिकं पुष्पं कुसुममाश्चर्यमभवावृष्टं पुष्पकीदृशेहस्ते मांगल्यनि
मित्तं यद्दूर्णीवलयं कंकणं तदस्यास्तीति तद्वतिमंदाक्रांता वृत्तं ८१ इत्यमिति नागं कुमुदत्त्रिभुवनगुरो रामस्यौरसं पुत्रं धर्मपत्नी जमैथिलेयं
सीताजातं कुशं बंधुं लब्ध्वा कुशश्चातं तच्च कस्य पंचमं तक्षकपौत्रस्य पौत्रं बंधुं च संप्राप्त तयोर्मध्ये एकः कुमुदः पितुः कश्यपस्य वधाद्विषधरं रिपोर्गरु
डाच्छंकाभयमत्यजत् तस्माजगरुत्म जनकं तत्तकोभयदायदित्तिकथा प्रसिद्धात एव तत्क्षक स्य पंचमत्वमिति मीतिलकं चकं अपरः कुशःपौराणपुरवा
सिनां कोतःप्रियःशांता व्यालास्सर्पायस्यां तादृशीमवनिं भुवं शशास ररक्ष कुशेन गरुडादभयं व्यतारि कुमुदायते नापि जनपदे सर्पभयं न्यवारी
त्यर्थः औरसो धर्मपत्नीज इति याज्ञवल्क्यः ८२ इति श्री मालाचलान्वयसाधुश्री आरडकमल्लसमभ्यर्थितखरतरगच्छीय श्री जिनप्रभाचा
र्यविरचितायां राघवीयटीकायां शिष्यहितैषिण्यां षोडशः सर्गः समाप्तः कल्याणमस्तु श्री सर्वेषां शुभं भवतु ॐ राम राम

रघुवंश १७ सर्ग टीका प० ७

र०टी०
१

॥ श्रीः ॥ अतिथिमिति कुमुद्वती पट्टराज्ञी काकुत्स्थात्कुशात् अतिथिं नाम पुत्रमाप लेभे चेतना बुद्धिः पश्चिमाच्चतुर्थाद्यामिनीयामात् रात्रिप्रहरात् प्रसादं
नैर्मल्यमिव तद्वदित्यर्थः १ स पितुरिति अत्र उपमोपमानरहिता द्युतिः कान्तिर्यस्य सः पितृमान् पितृयुक्तः पितुर्मातुश्च वंशावुभौ तान् पवित्रीचकार
उत्तरदक्षिणौ उभौ मार्गौ सविता सूर्य इव २ तमिति आद्यो विद्वांसं वंशविदां वरः श्रेष्ठः पिता कुशः आदौ प्रथमं कुलविद्यानामान्वीक्षिक्यादीनां अर्थं
तमतिथिं ग्राहयन् ग्राहयति स्म पश्चात् पार्थिवकन्यानां राजपुत्रीणां पाणिग्राहितवान् चकार ग्रहणं तस्य द्धूकर्मकर्तृके चित् ३ जात्य इ
ति जातौ मनोहरो जात्यः शूरो वशी जितेन्द्रियः कुशोऽभिजातेन सुन्दरेण सोऽयं विनासरत्वयुक्तेन च हि नाजितेन्द्रियेण तेन पुत्रेणातिथिना
एकमात्मानमनेकममन्यत ज्ञातवान् जन्य इति पाठे जन्यो जनकः ४ स इति निजकुलोचितं वंश[illegible]योऽपमिंद्रस्य साहायिकं साहाय्यमुपेयि
वान् स कुशः समरे संग्रामे दुर्जयं जेतुमशक्यं ज[illegible]घाना वधीत् तेन च दैत्येन सन् पाऽवधिहतः साहायिकमिति [illegible]ये पद्धेत्यादिना ष्ठ(
च कुशचिन्ताठेऽजय्यमिति नाम्ना जयमात्मानेवा ५ तमिति नागराजस्य कुमुदस्य स्वसा भगिनी कुमुद्वती कुमुदानंदं कैरिवाह्लादकायिनं श
शांकं चंद्रमिव तं कुशमन्वगात् अनुगतवती ६ तयोरिति सतयोस्तयोर्मध्ये एकः कुशो दिवस्पतेरिंद्रस्य सिंहा[illegible]सनार्धभजनेन तद्वदासीत् ।
द्वितीयापि कुमुद्वती वासव्याः शच्याः पारिजातांशभागिनी पारिजातपुष्पविभागहरणशीला सखीवभूव ७ तदेति मंत्रिवृद्धाः सचि
वश्रे[illegible]शाः संग्रामयायिनो रणं गच्छतो भर्त्तुः कुशस्य समनन्तरमतिथिमभिषेक्तव्य इत्येवंरूपां पश्चिमामाज्ञां स्मरन्तः संतत
स कुशस्यात्मसंभवं पुत्रं समादधुः राज्ये निवेशयामासुः ८ तदिति तेऽमात्यास्तस्यातिथेरभिषेकाय चतुर्भिः स्तम्भैः प्रतिष्ठितं निर्मि
तमुद्वेदिं वेदीयुक्तं नवं विमानं शिल्पिभिः कल्पयामासुर[illegible]ची किरन् ९ तत्रेति तत्र राज्याभिषेकमंडपे प्रकृतयोऽमात्या हेम(

रामः
१

कुंभैः सुसुवर्णघटैः संभृतैः संघृतैः तीर्थराजादिपानीयैः [illegible] मर्त्यपाठे निविष्टं पितुः सिंहासनाधिष्ठितमतिथिमुपतस्थुः प्रापुः इह जातिमात्रविवक्ष
या परस्मैपदं १० नदद्भिरिति स्निग्धगंभीरं यथा स्यात्तथा नदद्भिराहताः निपुष्कराणि मुखानि येषां तैः तूर्यैस्तस्यातिथेरविच्छिन्ना संत
तिः प्रवाहो यस्य तादृशं कल्याणमनुमीयेतनुमितं पुष्करं करिहस्ताग्रे वाद्यभांडमुखे जलं इत्यमरः ११ दूर्वेति सराजातिथिर्वृद्धैः
प्रयुक्तं नीराजनाविधिमारात्रिकं भेजे कीदृशं दूर्वा च यवांकुराश्च प्लक्षत्वक् च अभिन्नं संदृष्टपल्लवं यस्मिन् पुटं मधुपर्कं चयेतानुत्तरं य
न्नते अभिन्नः पुटः कार्पासो वा भल्लातको वा अभिन्नपटेति पाठे ऽहतं वस्त्रं १२ पुरोहितेति पुरोहितोऽग्रगामी येषां ते द्विजातयो भूसुराः सर्वे अ
थर्वं जपैर्जयो विशेषैरार्थर्विभिर्मंत्रैर्जिष्णुं जयनशीलं तमभिषेक्तुं प्रचक्रमिरे प्रारंभंत १३ तस्येति तस्य राज्ञो मूर्ध्नि ओघः प्रवाहस्तेन मह
ती अभिषेकश्रीस्त्रिपुरद्विषो महेशस्य शिरसि सशब्दं यथा स्यात्तथा पतंती गंगेव व्यरोचत शुशुभे १४ स्तूयमान इति तस्मिन् क्षणे समये बं
दिभिः स्तूयमानः सराजा सारंगैश्चातकैरभिनंदितः प्रवृद्धो नंदितः पर्जन्यो मेघ इवालक्ष्यत तादृश तल्लोके रितिशेषः प० दक्षिणादानस्पष्टहिमांभः १५
तस्येति शोभनमंत्रैः पूताभिः पवित्राभिरद्भिर्वारिभिः स्नानं प्रतीच्छतः स्वीकुर्वतस्तस्य नृपस्य द्युतिर्दीप्तिर्ववृधे प्रवृद्धा कस्मात्कस्य इव वृष्टिसेका
द्वैद्युतस्य विद्युत्संबंधिनो ग्नेरिव १६ स इति [illegible] सोतिथिरभिषेकांते राज्यस्नानानंतरं स्नातकेभ्यः स्नातव्रतेभ्यः सुवर्णं ददौ दत्तवान् यावत्प्रमाणेन
तेषां स्नातकानां यज्ञाः प्रयोगाः पूर्णदक्षिणा येषां तादृशाः समाप्ताः १७ त इति प्रीतं सत् तुष्टं मनो येषां ते स्नातकास्तस्मै राज्ञे यामाशिषमुदी
रयन्स्म सा आशीस्तस्यातिथेः कर्मपूर्वजन्मोपार्जितपुण्यैस्ततोपि दृष्टैः सिद्धैः फलैर्दूरं पश्चात्कृता पश्चात्कृताः १८ बंध इति सोतिथिर्बद्धानां
कारागारस्थितानां बंधनच्छेदं धनमोक्षमादिशदादिष्टवान् वधार्हाणां वधयोग्यानाम वधप्रतानं वधाभावं च धुरं वहंतीति धुर्याः स्वपाद

यस्तेषां चधुरो भारान्मोद्वहं च गवां धेनूनां मदोहनं दोहनाभावं च १९ क्रीडेति तस्य राज्ञ आदेशादाज्ञातः पंजरस्था क्रीडापतत्रिणः शुकादयः
लब्धो प्राप्तो मोक्षो यैस्ते यथेष्टगतयः स्वेच्छया संचारिणोभवन् २० ततइति सोतिथिर्नैपथ्यानामाभरणानां ग्रहणं तदर्थं गजदंतासनं हस्तिदंते
निर्मितमासनमध्यास्तातिष्ठत् कीदृशं हृद्यांतरे कोष्टमध्ये विरचितं स्थापितं शुचि निर्मलं अंतरच्छदं वस्त्रोच्छन्नं २१ तमिति तोयेनां
भसा निर्निक्ताः क्षालिताः पाणयो येषां ते प्रसाधकास्तैरा कल्याणं भूषणानां साधनैः हीरकटकादिभूषणैस्तमुपसेदुरुपस्थिताः कीदृ
शं धूपेनाश्यानः किंचिच्छुष्कः के[illegible]शानामंतः स्वरूपं यस्य तं २२ तस्येति ते प्रसाधकाः मुक्तागुणेन बद्धमध्यंतरे स्रजो यस्य तत्तादृशा
स्यातिथेर्मौलिं पद्मरागेण [illegible] मणिना प्रसूयुर् योजयन् कीदृशेन प्रभामंडलशोभिना २३ चंदनेति ते प्रसाधका मृगनाभिना मृगम
देन शोभनो गंधो ऽस्यास्तीति मृगनाभिसुगंधिना रक्तस्य यांतः ताद्दृशेन चंदनेनांगरागं विरचय्य संपाद्य विन्यस्तो रोचनायत्ताद्दृशं पत्रति
लकं चक्रुः २४ आमुक्तेति सराजा अतिशयेन प्रेक्षो दर्शनीय आसीत् कीदृशः आमुक्तानि परिहितान्याभरणानि येन सः तथा स्रग्वी
मालावान् हंसस्य चिह्नं यस्य तादृशं दुकूलं बिभर्तीति तत् राजश्रीरेव वधूस्तस्या वरो भर्त्ता २५ नेपथ्येति हिरण्मये सौवर्णे आदर्शे
दर्पणे नेपथ्यं रूपं विलोकयतस्तस्यातिथेः छायाश्रितबिंबो मेरौ विद्यमानस्य कल्पतरोर्देवद्रुमस्य नवे उदिते सूर्ये भानाविव विररा
जे बभौ कल्पतरोरपि बहूलंकारित्वं ततः स्यादित्यारुणत्वात् हेमदर्शसादृश्यं मेरोरेव वर्त्तमानस्य कल्पद्रुमस्य सूर्यप्रतिबिंबः भवतीति मे
राविति आधिकः प्रयोगश्चिंत्यः २६ सइति सनृपः पार्श्ववर्त्तिभिः सेवकैरुदीरितोभिहित आलोको जयजयादिशब्दो यस्मिंस्तादृशः सुधर्मा
देवसभा तस्या अनवमामनूनां सभां ययौ गतवान् कीदृशैः राज्ञः ककुदं चिह्नं छत्रचामरादि तत्र व्यग्रा व्याकुलाः पाणयो येषां तैः २७ वि

५ सं

तानमिति सन्नृपस्तत्र सभायां वितानसहितमुल्लोचयुक्तं पितुरिदं पैत्रिकमासनं भेजेऽध्यतिष्ठत कीदृशं महीक्षितां महीपतीनां चूडाम
णिभिः शिरोरत्नैः स्पृष्टं पादपीठं चरणस्थापनं महीक्षित्पार्थिवो मूर्द्धाभिषिक्तो नृपः तो नृप इत्यभिधानचिंतामणिः २८ वभाविति
सम्भूपोतिथिः कुमारत्वात् युवराजत्वादधिराजस्य भावस्त्वमधिराज्यमवाप्य वृषभो ककुद्वलेखाभावात् कलामात्रस्वरूपात् सामग्र्यपरिपूर्ण
त्वमारूढः प्राप्तश्चंद्रमा इव २९ शुभमिति तेनातिथिनाक्रांतमधिष्ठितं मंगलायतनं मांगल्यगृहं शुभमे कीदृशं श्रीवत्सस्य लक्ष
णं चिह्नं यस्य तत् तत्पाविशालकेशवं विभोः संबंधिवक्षः कौस्तुभेनेव दर्पणं पूर्णकुंभ वृषभं युग्मचामरं श्रीवत्सस्वस्तिकं शंखं
पंचाप्यष्टमंगलमिति ३० प्रसन्नेति अनुजीविनः सेवकास्तमतिथिं मूर्त्तिमंतं सविग्रहं विश्वासमिवान्वपतन् ज्ञातवंतः कीदृशं प्रस
न्नमुखरागं न क्रूरवर्णो यस्य तं इव व्यासस्यैवं भाषते इति तादृशं पांमरस्कंधस्य सन्नं च तुर्यस्वाभाविकं सुखमिति सोमेश्वरः ३१ स इति ते
रावणस्यैवौजो यस्य तेन नागेन गजेन पुरमयोध्यां क्रममाणो भ्रमन् सोतिथिर्द्यां स्वर्गं चकार कीदृशः पुरुहूतस्य शक्रस्येव श्रीर्यस्य सः
तथा कीदृशीं कल्पद्रुमनिभा ध्वजा यस्यां सा तां विविधरत्नत्वात् क्रममाण इत्यनुपसर्गाच्चेत्यात्मनेपदं ३२ तस्येति एकस्य तस्य
राज्ञो मूर्द्ध्नि छत्रमुद्धृतं अमलत्विषा निर्मलप्रभेण तेन छत्रेण कृत्स्नस्य समग्रस्य जगतः पूर्वेषां राज्ञां दिलीपादीनां वियोगेन यदौष्ण्यं
तद्धतं स्फोटितं ३३ धूमेति धूमात्पश्चादग्नेः शिखाज्वालाप्रादुर्भवति रवेरुदयस्य पश्चाद् दंशवो रुचय उत्तिष्ठति स राजा तेजसाम
ग्न्यादीनां वृत्तं स्वभावं समतीत्य अक्रमगुणोऽश्रुतापादिभिः समं युगपदेवोत्थितः ३४ तमिति प्रीत्या स्नेहेन विशदैः प्रसन्नैर्नेत्रैः पौरयो
षितस्तं राजानमन्वपुरमनुगच्छंति स्म पुरप्रदक्षिणेन यत्र यत्रासौ वभ्राम तत्र तत्र व्यलोकयन्नित्यर्थः विभावर्यो रजन्यः शारदा ध्रुवसर

न्नैर्विमलैर्यातीति मिश्रकं वनमिति उक्तं च विष्णुपुराणे तस्य पृष्ठे स्थितो ध्रुवः॥ एवमन्नमयति चेद्गस्त्यादिकान्महान् ३५ अयोध्येति प्रशस्तेष्वा
यतनेषु अर्चिता अयोध्या देवताश्च प्रतिमागतैः सान्निध्यैरनुष्ठानैरनुध्येयमनुग्राह्यमिमं राजानमनुदध्युः रनुजगृहुः अनुपूर्वो ध्यायतिर
नुग्रहार्थः ३६ यावदिति अभिषेकजलेनाक्लृता सिक्ता वेदि यावन्नाशुष्यत तेन किंचिच्छुष्यति तावदेवास्य राज्ञो दुःसहः प्रतापो वेलां
तं समुद्रांतं प्राप गतः कोशदंडजं तेजः प्रतापः इत्येकः तेजस्विनां प्रतिपादकः शब्दः इत्यन्यः कंटकशोधनाधिकरे रूपाये वैरितापनिराकर
णाय प्रवर्त्तक इत्यपरे ३७ वशिष्ठेति गुरोः पुरोधसो वशिष्ठस्य मंत्राः धन्विनो धनुर्धरस्यास्य शराश्च उभये मिलिता यन्न साधयेयुस्तत्साध
ने किमपीत्यर्थः ३८ स इति धर्मशास्त्रं जानंतीति धर्मशास्त्रज्ञास्तैः सवोप्येयो यस्य सः धर्मज्ञः सखः ताहृशोऽतंद्रितोऽनलसः प्रत्यर्थिनो वा
दिनः प्रत्यर्थिनो प्रतिवादिनस्तेषां संशयस्य छेत्ता व्यवहारान्विवादविषयान्सप्रभृत्यनवरतं ददर्श निर्णयाय व्यवहारान्स्वयं परिहृत्य दि
तिया ज्ञवल्क्यः छेत्तेति स एवं धेवष्टीसमासः श्लोकचतुष्टयेन प्रकृतिरंजनमाह ३९ ततइति ततोनंतरं स भूयो विज्ञापनया साध्या
नि फलानि विज्ञापनाफलानि तैर्भर्तान् युजो जयो जयतिस्म कीदृशैः अभिव्यक्तेन मंदहासादिना प्रकटीभूतेन सुमनसो भावः सौमनस्यं
प्र[illegible]तादस्तेन कथितैः पार्कं सिद्धिं संमुखैः वदनप्रसन्नतया सिद्धाभिमुखत्वे ज्ञापिते कर्मनिष्पत्तौ ज्ञापनया भूत्वा सिद्धिर्जा
ता कुसुमाद्यभिव्यक्तौ फलसिद्धिर्युक्ता यते ४० प्रजा इति तस्यातिथेर्गुरुः पिता कुशस्तेन न[illegible]भसा श्रावणेन घन इव वविवर्द्धिताः प्रजा
स्तु तस्मिन्नूपेनमस्य भाद्रमासे ताः प्रजा नघन इव भूयसीमधिकां वृद्धिमापुः प्रापुः ४१ यदिति स राजा यदुवाच तन्मिथ्याऽसत्यं न

यच्छद्दौ तत्पुनर्न जहार न हृतवान् शत्रून् उत्खायोन्मूल्य प्रतिरोपयन् सभग्नव्रतोभूत् विजितेभ्यो राज्यं न वितरामीति च यित्वा पिकरु
णया ऽवशेषावितीर्णवान् वितीर्यापि तेषां दौरात्म्यमालोक्य भूयो हृतवान् एवं भग्नव्रतो भूदिति भावः उत्खातप्रतिरोपणमपि प्रकृति
प्रीत्यर्थं ४२ वय इति वयो यौवनं रूपं सौंदर्यं च विभूतिरैश्वर्यं च एतेषां मध्ये एकमेकं मदस्य गर्वस्य कारणं तस्मिन्नतिपौतानि मद
कारणानि समेतानि मिलित्वा स्थितानि असमनोनोत्सिषिधुः नो [illegible] खलं जातं उक्तं च यौवनं धनसंपत्तिः प्रभुत्वमविवेकता एकैक
मप्यनर्थाय किं पुनर्यच्चतुष्टयं ४३ रम्यमिति इत्थं पूर्वोक्तेन प्रकारेण नवासरं प्रतिदिनं जनिता रागः प्रीतिर्यासु तासु प्रकृतिषु समचिवे

नैवोप

षु स राजा दृढमूलो दुमस्तद्वाद् भूयासीत् ४४ अनित्या इति यतो वहिर्भवा बाह्याः शत्रवो अनित्याः कदाचिद्बाधंते कदाचिन्नेत्ये वि
[illegible] द धते तथापि सदापि प्रकृष्टा दूरस्थाः अंतोहितोरभ्यंतरान् अंतःस्थितान्नित्यान् सर्वदेहस्थायिनः षड्रिपून् काम
क्रोधलोभमोहमदमानान् जयत् ४५ प्रसादेति प्रसादसुख खेप्रसाद विमुखेति पाठे प्रमादो अनवधानता यादयः स प्रव्यसनानि ता
द्विमुखे रहिते तस्मिन् राजनि स्वभावतः प्रकृते अपल्लापिश्रीर्लक्ष्मीः निकषे हेमपर्ष णपाषाणे हेम्नः स्वर्णस्य लेखेवानपायिनी स्थिरी
भूता वभूव उक्तं च स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पंचमं महच्च दंडपारुष्यमर्थदूषणमेव चेति षट् प्रमादा इति ४६ कातर्य
मिति केवलासौर्यवृत्तिः केवलानीतिः सामदानभेददण्डरूपा कातर्यं भीरुत्वं नीतिस्तं सौर्यं स्वापदा व्याघ्रादयस्तेषां चेष्टितं अतः ८
कारणात्समेताभ्यां सौर्यनयाभ्यां सन्नपः सिद्धिमेवैच्छत् उक्तं च तीक्ष्णाद्विजते लोको मृदुः सर्वत्र बाध्यते एतद्बुध्या महाराज

मातीत्यत्र मामन्दुर्भवेत् व्याघ्रादयो वनचराः पशवः श्वापदा इति हलायुधः ४७ नतस्येति राज्ञा महर्षिमित्रोदास्तस्य दृष्ट्या अस्मिन्मंड-
लेन्यस्ताः प्रेषिताः प्रणिधयश्चाराः एवं दीधितयोरश्मयो येन तस्य विगतमन्त्रभेदोयस्मात्तस्य विवस्वतो रवेरिव किंचिदद्दृष्टं नासी-
त् उक्तं च चारैः पश्यंति राजानो वेदैः पश्यंति ब्राह्मणाः गावो गंधेन पश्यंति चक्षुर्भ्यामितरे जना इति ४८ रात्रिंदिवेति रात्रिश्चादि-
वाच रात्रिंदिवं तस्य विभागे षुयत्कार्यं यद्विधिर्महीक्षितां स्नानपानादि दृष्टमुक्तं तन्नियमेन नियमेनायमयं चेति विकल्पस्ततः प-
राङ्मुखः स राजा सिषेवे रात्रिंदिवेत्यत्र चतुरित्यादिना निपातः ४९ मंत्रेति तस्यानियमै त्रिभिः सह प्रतिदिनं मंत्रो वन्मन्त्रगुप्तं-
हतं द्वारं मंत्रधानोपायम् तमाकारादियस्य सःसेव्यमानोपि जातु कदाचिन्न सूच्यते ५० परेष्विति परेषु परकीयेषु आत्मीयेषु चा-
प्तिषु परस्परमविज्ञातैः रविज्ञातपरस्परैः अपसर्पैश्चारैर्यथाकालं यथासमयं स्वपन्नपि शयानोपि सन्नपो जजागार प्राबुध्यत गुप्तमं-
त्रस्य फलमाह ५१ मध्विति मधु शुभं सुखं प्रधानं येषां ते तस्य पूर्वस्य प्रारंभा गूढत्वं प्रयत्नात्तथा विदेहिरे विपाकं गताः कीदृशाः
प्रसवे दत्तया कृता कृत निरूपणेन निरत्यया निर्बाधाः तथा गर्भेपि लंतिगर्भशालयः षष्टिकास्तत्सधर्माणः षष्टिकुल्याः शालयो विष-
व्यमनोहरं सुखे मधं सुखं मंजरीयादिर्येषां ते तथा प्रसवेदत्तेन ह्रषमादिमत्त्वेन निरत्यया निरुपद्रवाः अप्रमेतर एवपचं-
ति मध्वेति मध्वगयेत्यादिना निपातः ५२ अपेति उपचितोपि स[illegible] मृद्धोपि सराजा जातु कदाचित् पथ्येनान्याय्येन न प्रववृते न
प्रवृत्तः तत्रार्थांतरमाह हि यतः सरितस्ततः समुद्रस्य वर्धमानापि सतां न दीपुखे नैव मत्स्यानं गमनं तत्र तु वेलोल्लंघनेन ५३ दुर्गाणीति

छिद्रो शत्रूणां यो कुरपि तस्य सम्पत्तेर्दुर्गमोणिवमादीनि दुर्गाणि दुर्ग्राह्याण्या सत्वमस्तु यो कुर उरव्यव प्रैः किंभूयो जनमित्याह हि यतः
गजेन्द्रमास्कंदति हंतीति ताहृशोपि सिंहो भयाद्गिरिगुहायां शेते गिरिगुहाशयो न किंतु स्वभाव एव ५४ कामिनीमिति प्रकृतीनां वैराग्यं स (
घ एव सामर्थ्यं निवारयितुं कामम त्यर्थं दत्तमः समर्थः तत्पापियस्य महतो त्यनुरागहेतोः प्रतीकारः कर्त्तव्यस्तत्स न्धपोनैवोत्पादय
तिस्म प्रकृतीनां वयन्त्लोभं विरागकरणेनोत्पादयेदिति कौटिल्यः ५५ शाक्येति सत्नो नयशास्त्रविदस्तस्य शक्तिमतो बलवत
स्तस्य मत्रपस्य शाक्यं पुराजनस्यात्रासंभवत् तत्र हृष्टांतमाह समीरणसहायोपि वायुसाहाय्यं प्राप्तोपि दवानलो वह्निरंभः पानीयप्रा
प्तीनं भवति तस्मादधिकबलस्तु दुर्जयः समे रोसंदोपसुंदन्यायः अत्र तत्ताम्यां संधिकर्तव्यत्वात् हीनेयात्रां न कारेत्सर्थः।
५४ नधर्ममिति अर्थकामाभ्यां धर्मस्य बाधेन वाधितवान् तेन धर्मेणतावर्थकामौ न च कामेनार्थं न च बाधे कामं च नार्थेन च [illegible] आर्थ एवं र्थ=
स त्रयो त्रिषु पदार्थेषु सदृशः समः उक्तं च धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः अधुना ज्ञातिकृतां हानिं परिहरति ५
८ हीनानीति बलेन हीनानि मित्राण्यनुपकर्त्तॄणि अनुपयोगीनि बलेन प्रहृष्टानि विकुर्वते अपकारं विदधति अतः कारणात्तेन राज्ञा मध्य
मशक्तीनि मध्यमबलानि स्थापितानि विकुर्वत इति अकर्मीश्रेति समस्ततत्र अरंसौ तनुसेवं धं तथा च शक्रमागमं रद्गतावत्स ने मन्त्रमि
त्रं द्वेधं चतुर्विधमिति कामंदकः ५९ परेति परस्य आत्मानं प्रशक्त्यादीनां सादितः शक्त्यादीनां बलावलं परिच्छिद्य विचार्य सम्यक् पः
परस्मात् शत्रोः सकाशादे[illegible]भिः शक्त्यादिभिर्बलिष्ठश्चेत्तदा शत्रुं प्रति प्रयोगतवान् अन्यथा शत्रोः सकाशाद्धीनस्तदा स्वस्थानं रक्षेत्स्थितिस्थ

तः शक्रेभ्यो वा भवद्याचितस्तेनेन पौनरुक्त्यं चिंत्यं ६० कोशादिति कोशाङ्कुडागारात् जानीराश्रयणीय त्वमितिहेतोस्तस्मात् सर्वोऽपि संगृहीतो
मान्त्वहस्थिते तेन सेवाव्रतमाह यतो गुरुगृहे भोजनलसहितो जीमूतो जलदः आतंके रमिगमपते सेवते ६१ परेति परे परमार्थोपपद्यते तीर्थिकवृत्तिरक्त
मीपदः सत्त्वः स्वेच्छालीयेऽब्जुकर्मस्यद्यते उद्युक्तो भूत आत्मनो रंधमाह णोत आ ब्रादयामास द्विपां रंध्रे सु आहस्व ६२ पित्रेति दंडो बलेति
[illegible]ध्येयस्य सदंडवान् तस्य दंडवतः भूपस्य पित्रा कुशेन संवर्द्धितो नितं कृतं सिद्धिनमस्त्रयेन स ताहमः सो परायेन युक्तेन जीवति सोपरा
यिको दंडो मूलवलं स्वदेहान्न व शिष्यत विशिष्टेनाभूत पित्रा संवर्द्धितत्वादिना स्थिर देहतुल्यो भरदित्यर्थः ६३ सर्पस्येति पन्नगस्य शत्रुः
सर्पस्य शिरोरत्नमिवा स्पृशत्वयः अभवादयस्तासां त्रयेन चक वज्जिहार सत्तु राजा अर्थे संलोहं अयस्कांतः चुंबकपाषाणः [illegible] वपरस्मादरेः स
काशात् तत्कृत्तित्रयं च कर्षकविंतवान् ६४ वापीष्विति सार्थाः व्यवहारशीला वणिगादयः स्वदेशम् आयंती धुनदी षु वापीषु वि
व वनेषु काननेषु उपवनेषु वेवाटिकासु च आद्रि शुगिरिषु तदीये भुवस्य सुरहेष्विव स्वैरं यथेच्छं चेरुर्व अमुः स्वैरमिति स्वादी
रिणापारितिहद्धिः शिष्टप्रतिपालनमाह ६५ तपइति विघ्नेभ्यो विघ्नकारिराक्षसादिभ्यस्तपः हः [illegible] चौरायणादिकं रक्षन् सोति
थि स्तत्करे भाश्रसंपदो वित्तानि रक्षन् आश्रमैर्ब्रह्मचारिभिमुखे वर्णैर्ब्राह्मणादिभिर्यथास्वं यो यस्य भागस्तेन षड् शः षष्ठांशस्तं भज
तीति ताद्[illegible] कुचके कृतः तद्रहतोः कर पत्यो श्रो रदेवतयोरिति सुदूतलोपश्चेति तत्स्को रइति निपातः ६६ खनिभिरिति भूः खनि
भिराकरैः रत्नं सु भुवे भास्तं [illegible] देवैः सस्यं धान्यं च वनैर्गजां श्र अग्नो रक्षासदृशमनुरूपमेव वेतनं मूल्यं तस्मै राज्ञे दिदेसा दत्तवती ६७ सइति बलसुखः

कार्त्तिकेयस्तद्वद्विक्रमः पराक्रमो यस्य स तादृशः स राजा ब[ल]उद्धानां बलानां मौलभृतकादीनां ब[ला]नां गुल्मानां स्कंधिविग्रहादीनां साधनीये षड्वस्तु
षु विनियोगज्ञः प्रयो[ग]ज्ञोऽभूत् ६८ इतीति सर्वोत्कृष्टप्रकारेण चतु[र्]विधां दंडनीतिं क्रमात् प्रयुंजानः स राजा त्रिविधित्तस्मादंडनीतेः फलमप्र
ती घातमवाहतमातीर्[त्वा] प्रीत्यनशेषशापमंत्रिपुरोहितसेनापत्याद्यष्टादशकं पर्यंतं दंडनीतिनिरुच्यते इति कामंदकः मंत्रिपुरोहितसेनापतिरा
जदौवारिकांतर्वांशिकप्रशास्तृसमाहर्तृसन्निधातृप्रदेष्टाध्यापकदंडपालकारकदुर्गपालस्त्रीपर्यंतमिति कौटिल्यः एते षुसर्वे षुसाफ
ल्यमापेतपर्थः ६९ कूटेति कूटयुद्धं कपटसंग्रामं तद्विधिं जानातीति तादृशोपि सन्मार्गेणन्यायेन योधिनि युद्धं कुर्वाणे तस्मिन् रा
जनि वीरं कामयते वीरकामिनी जयश्रीर्विजयश्री रमिसारिकावृत्तिं भेजे सिश्रायकोतार्थिनीतु याया[ति] ति संकेतसाभिसारिके
तमरः ७० प्रायु इति प्रायो बाहुल्येन प्रतापभग्नत्वात्पीडितत्वाच्च तस्यन्नपस्य गंधेनैव भग्नाः पलायिताः अन्यदंतिनो येन तस्यां
धद्विपस्य वारीणं रणो दुर्लभो बभूव खलु योगनिषेधात्संवधेषष्टी ७१ प्रवृद्ध इति प्रवृद्धः प्रवृद्धो ह्रीयते द्वीणो भवति समुद्रोपित
थाविधः प्रवृद्धः सन् क्षीणः स्यात् पुनः स राजा तत्समवृत्तिरपि ताभ्यां चंद्रसमुद्राभ्यां सदृशोपि ताविव चंद्रसमुद्राविव न क्षयी क्षीयवान्ना
भूत् ७२ सं इति संनो विदितः सः स्वशादरिद्र युक्ता अर्थिनो याचका महत तस्त स्मातिथेरभिगमनात् सेवनात् दुरधेः समुद्रात् जीमूता मेघा द्र
व दात्त्वं वदान्यत्वं प्रापुः लेभिरे ७३ स्तूयमाना इति स्तुत्यं श्लाघ्यं एव कर्म समाचरन् विदधानः स्तूयमानः स राजा जिह्राय लज्जते स्म स्तु
त्तिं विना कथं विख्यातिरित्याह तां स्तुतिं कुर्वंतीति स्तुतिकारिणस्तेभ्यो ह्रीः इति तस्य नृपस्य यशस्तथापि प्रथितमासीत् अ
५ सौ स्तुतिं विधानोपि स्तुतिं न सहते इत्येवं रूपा व्रीडिरभूदिति भावः ७४ दुरितमिति। निजदर्शनेन दुरितं पापं घ्नन् दूरीकुर्वन् तावार्थी

६

नतत्वप्रतिपादनेन तमोऽज्ञानं नुदन्निव तदिन्वातिथिरुदितः सूर्य इव प्रजाः शास्त्रसंवर्द्धयांचक्रे अग्निरिव कपिलासत्री राजा जिगिवुर्म
हेदाधिः हृष्टमात्राः पुनंते ते तस्मात् द्वंद्व पुनितपश्च इति मनुः ७५ इंदोरिति इंदोः श्वेद्वसोऽशवः करा पद्मे कमलेऽगतयो गतिरहिताः
सूर्यस्यांशवश्च कुमुदे गतिरहिताः गुणिनस्तस्य राज्ञो गुणाः आह्लादयो विपक्षेषु शत्रावप्यंतरमवकाशं लेभिरे प्रापुः तस्य गुणैः शत्र
वोपि स्वमहत्वयान्नितार्थः ७६ परेति अश्वमेधार्थं जिगीषा जेतुमिच्छा रस्यातिथेः परस्य शत्रोरभिसंधाने पराजये परं तात्पर्य
युक्तमपि चेष्टितं नतत् तद्धर्ममेव केवलं जयार्थं तस्य दिग्विजयो न लोभार्थमितर्थः शाक्यादिभिरभिसंदधातरभिनयवाक्यानु
सारेणाभिसंधानपदस्य योगः ७७ एवमिति एवमुक्तप्रकारेण [illegible] यदुपागच्छत् अमावास्ते [illegible] जो यत्र तादृशेन प्रशस्ते निर्दिष्ट
नादितेन वर्त्मना देवानां सुराणां देवो हर्षबेंद्र इव सो तिथी राज्ञां राजा बभूव ७८ पंच[illegible]ममिति साम्ययोगतः सौर्यादिगुणैस्तोसा
म्येन शक्रं धर्मराजपादः प्रतिवे श्रवणानां लोकपालानां मध्ये तं पंचममाहुः पंचभूतानां पृथिव्यप्तेजोवायोव्याकाशादीनां महतां म
ध्ये षष्ठमाहुः परप्रयोजनार्थ कार्यत्वात् महतां कुलभूभृतां कुलाचलानां महेन्द्रादीनां सप्तानामष्टममाहुर्लोका इति शेषः भूमिधार
णत्वात् महेन्द्रो मलयः सह्यः शुक्तिमान् ऋक्षपर्वतः विंध्यश्च पारिजात्रश्च सप्तैते कुलपर्वता इति विष्णुपुराणे ७९ दूरेति नृपालाग्रन्ते
नृपाः शासने लेखादावर्पिताः तस्यातिथेराज्ञो दूरादुपस्थितैः दूरीकृतातपत्रैः शिरोभिर्दधुः धारयन्ति स्म यथा देवाः पौरंदरीं पुरंद
रः शक्रः स्तस्तां संबन्धिनीं शेषां निर्माल्यं दधते ८० ऋत्विज इति महाक्रतावश्वमेधादियोगे स राजा दक्षिणाभित्ता पातेन प्रकारेण
ऋत्विजो याज्ञिकानानर्च पूजितवान् यथाऽस्य राज्ञो धनदस्य च नामाभिधानं साधारणं भूतं समजनि न तु व्यापारः कुबेरस्तु धनं

वर्जित

७

दयतेरक्षतीति कर्मणा धनद इति कथ्यते अतो धनं ददातीति धनद इति नामप्रापेत यः ८१ इंद्रादीति तस्मिन् राजनि शक्रा(

द्यः प्रधानलोकपालादिगधीशान् दंडेनोपायभेदे[...]नोप. न तस्य वशीकृतस्य नृपस्य वचरितं भेजिरे प्रापुः कथमित्याह इंद्रा

दृष्टिर्जितानि यमितानि रस्तागदस्य रोगस्य उद्रेकमाधिक्यं यया तादृशी दृष्टिर्यस्येति तथा अमृतोयमोमृत् यादसां जलजंतू

नां नाथः पतिर्वरुणो नौचरणं नाविकानां कर्मणा संचारे शिवो निर्विघ्नो कृतो जलपथो जलमार्गो येन तादृशः तदनु सर्वपिंडी

इंद्रादीनति धिः सत्कारकरणे तत्परानपेक्षमानः कुबेरः कोशस्य भांडागारस्य वृद्धिं विदधे कृतवान् मंदाक्रांता वृत्तं तल्लक्ष

णं जलधिषडगैर्म्भौं नतौ ताद्गुरू चेत् इति भद्रं ८२ इति श्रीमालान्वयसाधुश्रीअरडकमल्लसमभ्यर्थितखरतरगच्छी

यजिनप्रभाचार्यपादपद्मोपजीविवाचनाचार्यचारित्रवर्द्धनविरचितायां राघवीयटीकायां सप्तदशः सर्गः संपूर्णो भूत्

७ शुभमस्तु सर्वेषां कल्याणमस्तु राम ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥॥

७

रघुवंशटीकासर्ग १८१०५

र०टी०

१

सइति निर्जिताः पराजिताः शत्रवो येन स तादृशोऽतिथिर्नैषधस्यार्थपतेर्निषधराजस्य सु[illegible]तायां दुहितरि निषधाभिधनाम्नो नगेन्द्राद्गिरिः
स्तेसौ तस्य कौशल्यान्वयनन्दनः सारो बलं यस्यां तेषु उत्तमतादयामास जीजननत् यं पुत्रं निषधाख्यं निषधनामानमेवाहुर्लोका इति शेषः सर्गे स्मि
न्नुपजातिछन्दः अनुप्रासालंकारश्च १ शब्दादीति कुमुद्वत्यापत्यं कौमुद्वतेयोऽतिथिः शब्दरूपरसगंधादिसुखविरक्तः पञ्चसु जातस्मिन्निष
धनाम्नि पुत्रे प्रतिष्ठितो राजश्रेष्ठो येन स कुमुदवद्वदातैः शुभ्रैः कर्मभिरर्जितां द्यां स्वर्गमारुरोह आरूढः २ पौत्र इति कुशेशयं कमलं तद्वद्दी
र्घे नेत्रे यस्य स तथा सागरोऽब्धिस्तद्वद्धीरं चेतो यस्य तादृशः तथैकस्मात्सौवीरेति सः पुरार्गलोवद्दीर्घौ भुजौ यस्य स तथा कुशस्य पौत्रो निषधः
ससागरां समुद्रपर्यन्तामेकमेवातपत्रं यस्यां तां भुवं भूमो जापालयत् भुजो नवनघ्ति परस्मैपदं कु[illegible]शेशयमिति शयवासवशिष्टकालादिस्मल्लु
क् ३ तस्येति अनलस्याग्नेरिवौजो यस्य स तथा तस्य निषधस्य तनयः पुत्रो नलाभिधानो नलनामा तस्य निषधस्यान्ते नाशे वंशश्रियं राजलक्ष्मी
प्राप नलिनाभं पद्मसदृशं वक्त्रं मुखं यस्य स तादृशोयो नलो नड्वलानि नडप्रायाणि सरांसि गजश्वपरे[illegible]बोघ्नत् [illegible] बलानि सैन्यानि अमृ[illegible]
त्समर्द्दयन्निमनड्वलानीति कुमुद्नड[illegible]वेतसेभ्योड्मतुप् ४ नभइति न[illegible]भस्यैरैवैगीतं यशः कीर्तिर्यस्य स नलो नभस्थलमाकाशमेव स्थलं
तद्व्यापिनाम तनुर्यस्य तादृशेन नभः शब्दमयेन नाम्ना ख्यातं प्रसिद्धं द्वितीयलोकानां कांतं रम्यं नभो मासं श्रावणमासमिव तनूजं पुत्रं लेभे प्राप ५ त
स्मादिति धर्मोत्तरो धर्मप्रधानस्तत्त्वमवस्तस्य नभस उत्पत्तिस्थानं नलस्तस्मै नभसे उत्तरकोशलानां प्रभुत्वं राज्यं विसृज्य दत्वा जरसा जरया पदिष्टं
प्रापितं मनोगैरजर्यं संगतं मनः पुनरदेहबंधाय मोक्षाय बबंध मोक्षार्थं वनं जगाम सर्पः अजर्यं संगतमिति निपातः ६ तेनेति तेन नभोनाम्ना राज्ञा

रा०म०

१

द्विपानां पुंडरीकः करीव राज्ञां नृपाणां अप्यन्यो जेतुमशक्यः पुंडरीकः पुंडरीकाभिधानः पुत्रो जन्युत्पादितः पितरि शांते दिवं प्राप्ते सति
आहूतः पुंडरीकनामा पुत्रो योग्येन तथाभूतं पुंडरीकं पुंडरीकाक्षं विष्णुमिव श्रीर्लक्ष्मी राज्यश्रीराश्रिता जय्यः इति जय्यजय्यौ शक्यार्थे इति निपातः ८ स
इति अमोघं सफलं धनुः शरासनं यस्य सः पुंडरीकः प्रजानां लोकानां क्षेमवि[illegible]धायी दत्वा प्रवीणं क्षेमधन्वानं पुत्रं क्ष्मां भुवं लंघयित्वा प्राप्य
वनेक्षमयो [illegible] शांतः सन् त्वाम तनुं रूपादेहस्त पश्चाचार तेपे -- गतस्पृहविवक्तयाद्विकर्मकर्तृ ९ अनीकिनीति तस्यापि क्षेमधन्वनः
समरे रणे अनीकिनीनां सेनानामग्रयायी अग्रगामी देवप्रतिमः सुरसन्निभः सुतोऽभूत् यस्य सुतस्यानीकपदमवसाने अंते यस्य तत्तादृशं
देवशब्द आदिर्यस्य तत्तद्देवनाम त्रिदिवे स्वर्गेऽपि प्रख्यातम् तहि रण्यपूर्वं कशिपुं प्रवक्ष्यते इत्यादिमहाकविप्रयोगत्वात् साधुत्वमस्यापाऽ
लक्षितलक्षणाप्रसंगात् १० पितेति समाराधनतत्परेण [illegible]भावधानेन तेन देवानीकेन सपिता क्षेमधन्वा यथैव पुत्रवान् एवम्
वत्सैवाधिकवत्सलेन प्रेमवता तेन पित्रा स पुत्रः पितृमान् पितृसहितः आसीत् उभावन्योन्यं योग्यावित्यर्थः ११ पूर्व इति गुणानामेक
निधिर्मख्याहूतयज्वा तयोः पितापुत्रयोर्मध्ये पूर्वः पिता क्षेमधन्वा आत्मसमे स्वतुल्ये आत्मभवे पुत्रे देवानीके चिरोढां चिरायधृतां वर्णाश्रम
णादीनां धुरं भारं निधाय निक्षिप्य यजमानलोकं दिवं जगाम गतः १२ वशीति वशी जितेंद्रियस्तस्य देवानीकस्य सुतस्तनयो वचसंवदत्वात् प्रियंवद
त्वात् तेषां निर्वाधवान्नामेव द्विषामरातीनामपि इष्टोऽभिमत आसीत् बभूव हि यस्माद्धेतोः सकृत्प्रयुक्तं माधुर्यं गीतं विविग्नान् त्रस्तानपि हरिणान्
गृहीतुं व्यावर्त्तयितुं मृष्टं प्रभुः स्यात् १२ अहीनेति सोऽहीनगुरहीनगुर्नामा [illegible] समग्राणि [illegible] खिलानां अनुकंसपणा शरत्सन्निकाशः अहीनं संसर्गे [illegible]

णं धनं यस्य स तथा पापु वा प्रियो हीनगुणा नो दुष्टाचाराणां संसर्गः संगमस्तस्मात्तरा ऽसुखत्वं ततो नर्थैरनर्थमूलैर्व्यसनैः स्त्रियो वा त्वादिभिर्हीनो
रहितः ३ुंम १३ गुरोरिति गुरोर्देवानीकस्यानंतरं पुंसामंतरं विशेषं जानातीति तादृशः आद्यः पुमान् विष्णुरिवावतीर्णश्चतुरः प्रवीणः सन्नाही
नगुरुः स्वलितैर्विघ्नैरहितैश्चतुर्भिरुपक्रमैः सामदानदंडभेदैश्चतुर्दिशामीशः स्वामी बभूव उपाय इत्यर्थ आरंभः स्यादारंभ उपक्रमः धर्मोपधाद्य
र्थोपधा कामोपधा भयोपधा चेति मंत्रपरीक्षणोपाधिरिति कश्चित् वर्गत्रयसंशुद्धानमत्यान्त्रीपुयोजयेदिति चाणक्यः १४ तस्मिन्निति त्र[illegible]रीणं
येतरि तस्मिन्नहीनगौ भूपे परलोकयात्रां स्वर्गप्रयाते सति उच्चैः शिरस्त्वान्महत्त्वाज्जितः पारियात्राख्यो गिरिर्येन तं पारिजातनामानं तनयं ल
क्ष्मीः सिषेवे भेजे १५ तस्मादिति तस्मात्पारिजाताद्दलाभिधानो दलनामा पृथिव्याः पतिर्भूपो बभूव कीदृशो दमान्वितः क्षमावान् तथा
पद्मदलं कमलपत्रं तद्वन्नेत्रे यस्य सः कुंदमुकुलदंतो ऽरिपवो वैरिण एव दंतिनो गजास्तेषां सिंहः कुलमेव कैरवं कुमुदं तस्येंदुश्चंद्रः १६
तस्येति तस्य दलस्य सूनुः सुतः शीलः शीलनामाभवत् कीदृशः उदारं शीलं सद्वृत्तं यस्य स तथा शिलापट्टवद्विशालं वक्षो यस्य स तादृ
शो पेशलः शिलीमुखैर्बाणैर्जितो रिपुलोकः पद्मो येन तादृशो पीड्यमानः शालीनतामधृष्टतामव्रजत् [illegible] शालीनः कौपीने ऽप्यधृष्टाकार्ययो
रिति निपातः १७ तमिति अनिंदितात्मा यस्य सदयालुः आत्मना संपन्नं स्वतुल्यं शीले युवानं तरुणं युवराजमेव कृत्वा सुखान्यभुंक्त
यतो हेतोरुपरुद्धं तमेव स्वतंत्रं चेष्टितमेव वर्त्तनं यंत्रं तद्राज्ञो वृत्तमाचरणं सुखोपरोधि सुखविघ्नकरं राजकार्यं यस्मात्तादृनर्थकोशा चतु
था चोक्तं परैः हृत्सिपकार्यो यः कर्मण्याराम्नते स्वयं सो ऽपराद्धमिति ख्यातो राजा न सुखभाग्भवेत् इति आत्मसंभवः पुत्रः इत्यन्वयः १८ तमिति हू

पुत्रं

प्यानि कारणानि एवमतस्तरिली मातस्य यस्युतां जरा तेदलं जहार हृतवती कीदृशी विलासिनीनां स्त्रीणामरतौ न्नमासमर्थापि कीदृशं तं अनुरागा वं
धिबुभोगेषु अवित्तं तं लंपटं तथा सो भाग्य विशेषेण भोग्यं कमनीयं जरा गृहीतो न किंचित्प्रगल्भते विषयेषु अप्रगल्भमलीमसत्वती भोगे
सक्ती भवंतीयं तु नास्य पाटद्यातल्मिता र्थः २९ उन्नाभ इति तस्य शीलस्योन्नाभः तक्ष्ण तेषु स्तिहेर् नामयस्य तस्य तस्य आसीत् यपार्थमुन्नतेअ
तएवाय पार्थः नतेना भिरंध्रं यस्य सः तथा पंकजनाभः प[illegible] नाभः विष्णुस्तत्तुल्यः हतस्तस्य समस्तस्य न्रपमंडलस्य द्वादशराजचक्रस्य
नाभिः प्रधानभूतः भाग[illegible]रूपेण मध्ये ध्येय इति स्वार्थेर २० तव इति परं तदनंतरं तस्यो[illegible] न्नाभस्यात्मजः पुत्रः वज्रनाभ इति वज्रभृत्की(
दृशः वज्रधरः शक्रस्तद्वत्प्रभावो माहात्म्यं यस्य स तथा संग्रामे वज्रस्येव घोषो शब्दो यस्य सः वज्राणां हीरमणीनामाकरः खनिमेखला
भूषणं यस्याः तस्याः पृथिव्याः स्वामी २१ तस्मिन्निति तस्मिन्वज्रनाभे मु[illegible]हूते नोपलब्धांशानां द्यां गते परलोकं प्राप्ते सति तस्मा[illegible]द्वज्र(
नाभात्संभव उत्पत्तिर्यस्य [illegible]तं वंडनामानमर्णवां ता समुद्रपर्यंता वसुधा मही [illegible]श्चवनिः उपस्थिते रत्नोपहारैः रुपाय नैरुपतस्थे कीदृशं उत्खा(
ताः शत्रवो येन तं तथा उपादेवे त्यादिमा संगतो तिष्ठते रामते रात्मनेपदी २२ तस्येति तस्य वंडस्यावसाने अंते हरिदश्वं सूर्यं स्तद्वद्धा
मते जो यस्य स तादृशः अश्वरूपः सर्वौषधिलावण्यः पितृमं पदं स्थानं प्रपेदे प्राप्तः वेलातटेषु समुद्रकूलेषु उषितासेनिका नाम श्चायस्य तं ता
दृशं पुत्रं विदो व्युषिताश्वनामानमाहुः कथयंति २३ आराध्येति व्युषितमर्भमेरीश्वरेण तेनाव्युषिताश्वेन विश्वेश्वरं महेश्वरमाराध्य
विश्वसमः सर्वत्र तुल्यवृत्तिः विश्वसह नामा सम्यगोनिखिलां विश्वंभरां भूमिं पातुं रक्षितुं सहः समर्थः आत्मा जमूर्त्तिरात्मा पुत्रस्तस्य आ
त्मा अधि[illegible] यद्वे उत्पादितः आत्मा वै पुत्र नामासीति श्रुतिः सोपसर्गत्वादात्मनेपदं २४ अंशेनेति हिरण्यनाभस्य देवतांशमित

यो विद्वान् रंशो हिरण्यनाभे तनये पुत्रे जाते स मृत्यन्ने सति तद्गुणैः ह्लादणं साजिलो सवायुर्हिरण्यरेता अग्निरिव नयज्ञो नीतिवित्त विष्णु
सहोद्विषा मरीणामसहः सुतरां समृद्धम भूत् द्विषामिति कर्त्तरि षष्ठी २५ पितेति पितृणां सुतोत्सादनादनृणः कृती पिता विश्वसहो ते
वयसि वार्द्धके अनंतानामक्षयाणि सुखानि लिप्सुर्लब्धुमिच्छुराजानुविलंबिबाहुं दीर्घभुजं तं हिरण्यनाभं राज्ञां नं कृत्वा वल्कलवान् वानप्र
स्थो वभूव सुखानीति विषयः स्यादिति षष्ठी निषेधः २६ कौशल्येति उत्तरकोश[illegible]लानां पत्युः स्वामिनः पतंगान्वयस्य सूर्यवंशस्य
भूषणस्य तस्य हिरण्यनाभस्यौरसो धर्मपत्न्यामुत्पादितो नेत्रे लसवो लोचनानंदकारी द्वितीयः सोमश्चंद्र इव कौशल्यनामा पुत्रो भू
त् कीदृशस्य तस्य सोमसुतः यज्वनः कृपापतंगः स्वगोमार्तंडः दत्य मिधानचिंतामतिः २७ यशोभिरिति यशोभिः कीर्तिभिराब्रह्मसभं
ब्रह्मसभापर्यंतं प्रकाशोतिप्रसिद्धः स हिरण्यनाभो निजे स्वकीये धिकारे राज्ये ब्रह्मिष्ठं ब्राह्मणभक्तं ब्रह्मिष्ठाभिधानं सतनुभूतिं
पुत्रमाधाय प्रतिष्ठाप्य ग्र[illegible]ब्रह्मभूयाब्रह्मसारूप्यां गतिं आजगाम गतः ब्रह्मभूयमिति भुवो भावे क्यप् प्रकाशोतिप्रसिद्धे स्यादित्यमरः २८
तस्मि[illegible]न्निति कुलस्यापीडनिभे मुकुटतुल्ये पुत्रजसिरम्य प्रजेप्रजेशे लोकनायके तस्मिन् ब्रह्मिष्ठे विपीडां बाधारहितां भुवा
सनमाज्ञा एवांकं चिह्नं यस्यां तां महीं भुवं शासति प्रतिपालयति सति प्रजाः आनंदजलैरश्रुभिः विलानाँ [illegible] दीर्णियासो तादृशस्त्रिरंतनं
दुःसमस्थवमस्तुः सुप्रजसीति प्रजा[illegible]मेघ[illegible]या [illegible] सिचू २९ तस्येति तस्य ब्रह्मिष्ठस्य पत्नी पुष्पनामानं पुत्रं यो ब्पांति थो प्रसीर्णि
मायां असूताजीजनत् कीदृशं प्रभया निर्जितः पुष्परागरत्नविशेषो येन सतं यस्मिन् पुष्ये उदिते जाते जनाः समग्रोत्सवं पुष्टिं ग्र

पुष्यनक्षत्रे यस्मिन् कस्मिंश्चिद्द्वितीये पुष्यनक्षत्रे [illegible]ष्यः पुष्यतिर्योन नक्षत्र इति पुष्यं परकृतं हन्ति न तु पुष्यकृतं परः अपि पापग्रहे चंद्रे पुष्यः सर्वा
र्थसाधक इति ज्योतिःशास्त्रे पुष्ययुक्ता पौर्णमासी पौषी त्यमरः ३० पात्रीति गुरुसेवनेन गुरोः शुश्रूषया पात्रीकृतो योग्यतां नीतः आम्नायेन स तथा पत्र
रथानां पक्षिणामिंद्रः गरुडः केतौ यस्य तस्य विष्णोः स्पृशा अनुकृता आकृतिर्येन सः पुण्डरीकपत्रनेत्रनामा पुत्रिणां पुत्रवतामग्र्यसंख्ये अग्रगण्यं ब्रह्मिष्ठं समारो
पयन्नीतवान् योग्यभाजनयोः पात्रमित्यमरः विहंगो विहगः पत्ररथः पक्षी खगो द्विज इत्यभिधानचिंतामणिः ३१ वंशेति वंशकरेणान्वयप्रवर्तनेन ते
न पुण्डरीकनाम्ना पुत्रेण वंशस्थितिं संभाव्य वृद्धो मघोनः शक्रस्य सखा सदृशो विषयसुखे विहृत्त गतं लौल्यं चापलं यस्य सः त्रिषु पुष्करेषु तीर्थे त्रिवारत्रय
मुपस्पृशन् स्नानं कुर्वन् सप्तर्षिभिः श्रांतिमापल्लभे ३२ महीमिति स तौ पुष्यनामनि महीपतिर्कीयेनिह्नि पमनी षिणे [illegible] परमात्मविदे जैमिनिमुनये अ
र्पितः शिष्यीकृतः आम्नायेन स महेच्छो महाशयो जन्मनः संसाराद्भीरुः स पुष्करपत्रनेत्रः सयोगाद्दृष्टयोगसहितात्तस्माज्जैमिनेः सकाशाद्योग
मधिगम्य प्राप्य अजन्मने मोक्षाय कल्पत समर्थोऽभूदिति भावः ३३ तत इति ततोऽनंतरं तत्स्वयं पुष्यपुत्रे [illegible] ध्रुवोपमेये ध्रुवसमे ध्रुवसंधिनामानि उर्वीं स
प्रपेदे प्राप्ता सत्या संधिः प्रतिज्ञा यस्य तस्मिन् ज्यायसि गरिष्ठे यस्मिन् ध्रुवसंधौ सन्नमतां नम्राणां नृपाणां संधिः ध्रुवो निश्चलोऽभूत् ध्रुवस्तूत्तानपा
दः स्यादित्यभिधानचिंतामणिः ३४ सुत इति शिशावेव बालक एव सुदर्शनाभिधे सुते सति मृगव्यसने विशाले अप्रदिष्णीयस्य स तथा । मृगयाविहा
री मृगयां गतो नृणां मध्ये श्रेष्ठः स ध्रुवसंधिः सिंहाद्द्विपदं पंचत्वं प्रवाप कीदृशो दर्शनीयेंदुः प्रतिपच्चंद्र इत्त इव प्रियं दर्शनं यस्य तस्मिन् ३५ स इति अ
मात्यवर्गो मंत्रिसमूहः नाथहीनाः प्रभुरहिताः प्रकृतीः प्रजाः आवेक्ष्य दृष्ट्वा एकमत्या संमतेन त्स्वर्गामिनः स्वर्गंगतस्य तस्य ध्रुवसंधेः कुलतंतुमूलते
कं तं सुदर्शनं शाकेतस्याऽयोध्याया नाथं विधिवच्चकार ३६ अप्रौढो बालः सुदर्शनो नरेंद्रो राजा यत्र तद्रघोः कुलं विभिस्तक भासीत् नवेंदुना नूतनचंद्रयु
क्तेन न[illegible]भसाकाशेन द्यावो एकः सिंहो यत्र तेन काननेन लघुकुड्मलमात्रे पत्रमात्रे पुष्करं यस्मिन् तेन तोयेन चोपमेयमभूत् ३७ लोकेनेति मोहितपरिग्रहा

=स्नि=

न्मुकुटधारणेन पितुरेव तुल्यो भावी स सुदर्शनो लोकेन संभावितः कलभः करिशिशुस्तस्य मालोपमेयः पुरोवाती पूर्ववातं त्र्यवाप्याशाः ककुभोदृशं वनं व्यापन
शीलादृशः ३८ तमिति यो रतः पुरवासिनः षड्वर्षदेशीयं षड्वर्षप्रमाणमपि तं सुदर्शनं प्रभुत्वात्मशक्तिमत्वात् अतिहस्तिपं तथा धोरणेन महामात्रेण
विलंबितो मध्यदेशो यस्य तं ३९ काममिति सः सुदर्शनः पैत्रकस्य पैत्रस्य सिंहासनस्य प्रतिहरणाय कामं निनिष्क्रितं नाकल्पत नासमर्थो भूत् तथा वि
चामीकरं स्वर्णं तद्युतिं जरेण पिंगलेन तेजो महिम्ना महत्त्वेन तत्सिंहासनं वितानमुल्लोचस्तस्य पर्यंतं व्याप ४० तस्मादिति भूपतयोऽस्य सुदर्शनस्य पादौ
चरणौ प्रसिद्धे हच्चैर्मौलिभिः शिरोभिर्ववंदिरे नमश्चक्रुः कीदृशौ तस्मात्सिंहासनात् किंचिद्विबाधोवती लौ तथा तपनीयस्य हेम्नः पीठं पादस्थानं
लघुत्वादसं[illegible] स्पृशंतौ सालक्तकौ लाक्षारसेन रंजितौ ४१ मणाविति अल्पप्रमाणमपि मनोरत्ने महानील[illegible]ति शाब्दः प्रभावात्सोमि ध्या
ना तथैवार्भके शिशावपि तस्मिन्सुदर्शने प्रयुक्तमहाराजशब्दः कोशदंडजा[illegible]तेजोभावान्निष्फलानाभूत् सन्महत्तरमोत्कृष्टा इत्यं प्रशब्दो वचनैः समासो
क्तिः मणिनीलादावल्पपरिमाणवर्णनं चितं महोदधिरिवाद्याधिकप्रदर्शिना तु ४२ पर्यंतेति तस्य राज्ञः कपो[illegible]लयोर्लोलौ चामरौ काकपक्षौ शिखय।
स्य तादृशादाननान्मुखादुच्चरितउक्तोऽपि वादः आदेशोऽर्णवानां समुद्राणां वेलास्वपि तटेष्वपि न चचाल न स्खलितः कीदृशस्य पर्यंतियोः संचारितेचामरे
यस्य तस्य ४३ निहत्तेति निहत्तो निष्पादितोऽभिषेकसमययोग्यो जांबूनदस्य कांचनस्य पट्टबंधो यस्य तादृशे ललाटे न्यस्ते रचिते तिलकं दधानः सुदर्श
नोऽरिसुंदरीणां सपत्नवनितानां मुखानि तेन तिलकेनैव सन्यानि रहितानि चकार हतवान् रमणमारणात् किंभूतः स्मेरं विकसितं मुखं यस्य स तथा
स्मेरमिति न किमपि तादृग्नारस्पतयः ४४ शिरीषेति सुकुमारस्य भावः सौकुमार्यं शिरीषपु[illegible]ष्पोपमं सौकुमार्यं यस्य स तथाभूतः सुदर्शनो भूष
णेनालंकारेणापि खेदं परिश्रमं जायाद् छे तस्मान्नितंतां तगुर्वीं अतिगरिष्ठां धरित्रीं मु[illegible]वोढुं भारं भावं अनुभावो न्तेजो विशेषाद्विभराचकार दधौ ४५ न्य
स्तेति [illegible] सराजाऽन्तराणां भूमिकाशालात स्पौ नस्तानि यदाराणां

लिखितान्यक्षराणि यस्यां तां लिपिमात्रकां यावत्कालेन सामस्त्येन न गृह्णाति तावच्छ्रुतेन शास्त्रादिना वृद्धसंयोगात् संवर्धितं इति राज
विद्यायाः सर्वाः फलान्युपाययुक्तान्यभव ४६ उरइति उरसि वक्षःस्थले पर्याप्तो ऽपरिस्फुरितो निक्षिप्तः भागो यस्याः सा प्रौढा भविष्यन्ती तस्यै ढंमा
विनं उदीर्यमाणेन वर्धमानेन संजाता लज्जा यस्याः सा लक्ष्मीः राज्यश्रीः एतत्पत्रस्य छत्रस्य छायाछलेन या जनेन तं सुदर्शनमुपगुह्य आलिलिंगान्य
न्यापि कमपि कामयमाना सापत्र्यापि कपरेणालिंगति ४७ अनुभवेति तस्य सुदर्शनस्य भुजेन भूमी [illegible] रक्षा वत्सा सीत् कीदृशेन हस्तचक्रपद्म
मालं युगपद्युपमानेन तत्ताद्दृश्यमनक्ति चानेनाप्राप्तवता तथा वक्षमशास्त्रमो वीः ज्यायाः किन लोके भुजे न विद्धं येन अस्य स्तत्र [illegible] रूपस्य तस्य रूपं स्थिये
नेति तस्य रूपः खड्गादिमुष्टेः सत्यादित्यमरः ४८ नेति कालेन गच्छति सति तस्य सुदर्शनस्य शरीरावयवाः केवलं वृद्धिं नययुः न प्रापुः किं तु लोकानां कांतात्र मि
लावनीयाः प्रारंभे सूक्ष्माः वंशोद्भवाः वंश्याः गुणाः सौर्यादयो [illegible] पितृप्रथिमानं पृथुत्वमापुः ४९ सर्वेति सर्वजन्मांतरेद्दृष्टः पारोया [illegible] सीताः स्मरन्नि
वातएव गुरूणामनल्पकरः स सुदर्शनः त्रिवर्गस्य धर्मार्थकामस्य अधिगमः प्राप्तिः तस्य मूले ति सो विद्याः त्रयी वार्ता दंडनीतिः पिताः प्रकृतीः स्वामात्या
न् जग्राह गृहीतवान् धर्मो धर्मो त्रय्याम् अर्थानर्थौ वार्त्तायां नयापनयौ दंडनीत्यामिति कौटिल्यः तेः विद्यायां त्रिवर्गमूलत्वे ५० वपुरेति असो
विनीयमानः ऽलं शिक्ष्यमाणः सुदर्शनो नरोचत शुशुभे कीदृशः उत्तरांगेषु वर्धते [illegible] किंचिद्गूढ विस्तार्य स्थितः तथान्नभ्राः उर्ध्व वत्सगात्र
त्यादस्यानपंचकेन स्थितिविशेषोपदर्शितः ५१ अथेति अथानंतरं सन्नृपः सुदर्शनो यौवनं प्रपेदे प्राप्तः किं विशिष्टं वशितानार मणीनां
नेत्रैर्निर्विश्रान्तविस्तारेण पेयं पातुं योग्यं मधुमदं कारित्वात् तथा मनसिजतरोः कंदर्पवृक्षस्य पुष्पं कुसुमं रागवल्लयाः स्नेहलतायाः प्रवाले

पल्लवं अकृत[्रि]मः स्वाभाविको विधिनिर्माणं यस्यास्तादृ[शं] दृसर्वांगीणं सर्वांगव्यापकमाक[illegible]ल्यानां अलंकाराणां जातसमूहं यादृशं यथ
मेविलसितस्य विलासस्य पदं स्थानं मालारूपकमतिशयोक्तिश्च सर्वांगीणमिति तस्या वादेः प्रथमपत्रपात्रे आप्नोतीति रूपलाघः ॥५२॥ प्रतिकू
तोति अथानंतरं यत्नस्तस्य सुदर्शनस्य शुद्धे अमले संताने कामाभिलाषो येषां तैरमात्यैर्मंत्रिभिः दाहृता आनीता राजकन्यास्त्रिनराज्ञा प्रथमप
रिगृहीते श्रीअभ्युत्थते श्रीभुवोकमंता यधिवि[illegible]विदुः हृतसापत्नीकं चकुः कोटेश्यः तत्तद्देशोत्तरनिर्गतैः संदेशहारकैश्चित्रपट्टलेखेण
नराजकुमाराय दर्शिताभ्यः प्रकृतिरचनाभ्यः प्रत्याकारविरचिताभ्यो प्यधिकतरं रूपं यासां ताः दूरस्थितकरस्य रूपेण योग्यरूप कुमारीणां
[illegible]तल्पपट्टलेखनादिकरणे रचना एककर्त[illegible]त्वे न सपत्नीभावादधिवित्तत्वं कृतसापत्निकाध्यूढाधिविन्नाथेत्यमरः द्वयमपि मालि
नीवृत्तमतिभद्रं ॥५२॥ इति श्रीमालान्वयसाधाश्रीअरडकमल्लसमभ्यर्थित खरतरगच्छीय नरवेबसतरस्यति वाचनाचार्य श्री चारि
त्रवर्द्धनविरचितायां रघुटीकायां शिशुहितैषिण्यामष्टादशः सर्गः १८ संहर्लोत्सव सर्वेषां शुभं भवतु कल्याणमस्तु॥

रघुवंश।८सर्गटीका।प०६

१

॥ श्रीः ॥ अग्निवर्णमिति ॥ श्रुतवतां पंडितानाम पश्चिमोऽग्रगण्यः वशी जितेंद्रियो राघवः सुदर्शनः पश्चिमे वयसि वार्द्धके स्वे पदे निजे राज्ये
अग्नितेजसमग्निवर्णनामानमभिषिच्य संस्थाप्य नैमिषं नैमिषारण्यं शिश्रिये शिश्रियेवे श्रितवान् सर्गेऽस्मिन् रथोद्धता वृत्तं तल्लक्षणं यथा रो
नरौ विहरथोद्धता लगौ १ तत्रेति ॥ तत्र तस्मिन्नैमिषे यतीर्थसलिलैः पानीयैः दीर्घिकाः सौधवासं राजमंदिरनिवासं विस्मृतो विस्मृतवान् फले
निस्पृहो निरभिलाषोऽशायीत् स्वर्गस्य तपसा वा स सुदर्शनः तपः संचिकाय संचितवान् आदिकर्मणि क्त्वा ययानदेवं तुरगाधिरूढकुरंगे वि
स्मृतो भवान् अंतर्भाविननिजार्थो वा अकर्मक विवक्षया कर्त्तरिक्तमुत्ताध पश्चात् कर्मसंबंध इति च कश्चित् विस्मृतमस्यास्तीति स पूर्णादि पाठा
न्मत्वर्थीये गुणम् तत्क्रियाव्यापकात् कर्मत्वमित्येके विस्मरन्निति वा पाठः २ लब्धेति ॥ तस्य सुदर्शनस्य सुतोऽग्निवर्णो लब्धस्य राज्यस्य पा
लनविधिर्विधानं तत्र बंदक्लेशं नापनलेभे यतो भुजाभ्यां निर्जिता द्विषः शत्रवो येन तेन गुरुणा पित्रा तस्य पुत्रस्य भोक्तुमेव मेदिनी भूः परि
लिता साधयितुं वृत्ताक्रांत्तसुत इति पाठः तत्र स्थैव व्याख्या लब्धापालनविधिर्येन तादृशो तासुतेभ्य खेदं नापेति ३ स इति ॥ सो धिपो राजा स्व
स्य कुलस्य वंशस्योचितं योग्यमधिकारं राज्यं का श्रीनसमाः संवत्सरान् स्वयमकर्त्तयश्चकार अतः परं तमधिकारं तद्राज्यं सचिवेषु मंत्रिषु नि
वेश्य संस्थाप्य स्त्रीविधेयं स्त्र्याधीनं नवयौवनं यस्य सः तादृशो भवत् ४ कामिनीति ॥ कामिनीनां सहचरस्य तस्य मृदंगानां तूर्याणां नादो येषु
तेषु वेश्मसु मंदिरेषु पूर्वोपि वयाबुक्तः उत्तरः पाश्चात्य उत्सवः कृष्ठिमेतं एवं उत्सवमयो हिं निरोधं चकार उपसर्गादस्यत्नेहा वा ५ इंद्रियार्थेति
इंद्रियार्थाः स्रक् चंदनवनितादयस्तान् ऊनं तदूहितं एकमपि क्षणान्तरं मुहूर्त्तं सोढुमक्षमोऽसमर्थोऽत एव दिवानिशं महोरात्रमंतरेवांतः
पुरे विहरन् सोग्निवर्णः समुत्सुकास्ता दृष्टिं दृष्टयोत्कंठिताः प्रजा नव्यपेक्षत नवीदो पचके दृग्गोचरो वा दिति मंत्रिणां गोरवात्क्रते तिमिः प्रजाभिः

कोऽस्ति तमपि वा क्षितमपि दर्शनं जातु कदाचिद् दत्तो तद्दर्शनं गवाक्षस्य वातायनस्य विवरे रंध्रे खलं विना प्रसारितेन केवलेन चरणेन कल्पितं ।
कृतं विरहविज्वलत्वात् दूरादिवास्थित तत्त्वच्चरणमात्रं दर्शितमिति तात्पर्यं ॥ ७ तमिति कृताप्रणतिर्ये स्त्र ऽनुजीविनो मंत्रिणस्तं चरणं भेजि
रे शिशिरे कीदृशं कोमलतानामयनं [illegible] रवानां रागं [illegible] आलिप्तं [illegible] तेन पानवीदितेन दिवाकरातपेन स्पृष्टं यत्पंकजं तस्य तुलामधिरोह ।
तीति तत् तुलामधिरोहतीति बहुलवचनात्कर्त्तरि क्विप् यद्रूपं पंकजेन यत् तुलाधिरोहणं तत् दस्यापास्ती त्व शोणदित्वात् चूताद्दृशां तं चरणं
स्त्रियापि तत्पमरः ८ यौवनेति विगाढः प्रौढः मन्मथः स्मरो यस्य सराज्ञा दीर्घिका वापी व्यगाहत व्यलोडयत कीदृशीः यौवनेनोन्नतमदानां
विलासिनीनां स्त्रीणां स्तनद्वीमेन लोलानि कमलानि यासां ताः तदंबुभिस्ताः सामंबुभिः [illegible] मोहन [illegible] कदिभागाया सा वा कामिनी ।
अव्यगाहत ९ तत्रेति तत्र दीर्घिकाक्रीडायामर्पिता दत्ता प्रकृतिकांतिः सहजशोभा यैर्वा तैर्मुखैरंगनाः स्त्रियस्तं नृपमधिकं यथा स्या
तथा व्यलोभयन् व्यरंजयन् कीदृशैः शंके न ह्रते लोचनांजनैर्येषां तैः तथा धौतैः क्षालितैर्यासोरागो ऽलक्तकादिस्तेन पाटलवर्णाश्रय
रा येषां तैः कृत्रिमशोभायां गतायामपि सहजशोभया तस्य तोष्रीतिमुपपादयन्निति तात्पर्यं ॥ १० घ्राणेति स नृपः पानभूमिर [illegible] चनः [illegible] स्तवास्तर
लादीनि स्त्रीयुक्तः सन् तत्पपद्य तत्प्राप्त कीदृशीः घ्राणं [illegible] यस्य [illegible] मधुमकरंद [illegible] पंकजिनीमिनोत्रः यथा सिता मिहिस्ति ।
नीभिर्वृतो [illegible] वेष्टितो द्विपो गजः पुष्पिताः सपुष्पाः कमलिनीर्भजते [illegible] निर्मलास्सूचनार्थं वासिता [illegible] करेणुवो [illegible]
त्वमयत्वसिद्धेः प्रियासहस्ताधिकेचित ११ सेति सातिरेकं ऽतिरहएकं [illegible] सातिरेकमदकारणं मुखासवमंगनाः स्त्रि
यो मिलेषुः [illegible] सोपि राजा तो भिस्त्रीभिरपि [illegible] हृतं दत्तं मुखासवमपि बत् बकुलेन तुल्यं दोहदं पानाभिलाषो यस्य ता दृशः व ।
कुलश्च प्रमदाननासवदोहदेन पुष्पतीति प्रसिद्धिः १२ अंकमिति अंके उत्संगे यत्परिवर्त्तनं तत्रोचितेयोमपउभवे तस्य राज्ञोंकमम्स्यता

निन्युर्नीतवन्तो के इत्याह हृदयंगमशब्दवल्लकीवीणामंजुवाक् मनोज्ञा वाणी वामलोचना रमणी २३ स इति स एवमात्मना प्रहतं तुष्करं खा
द्यमंडु सुखं येन स कृती कुशली राजा लोलानि चंचलानि मात्य लज्जो वलया नियस्य सो ऽभिवर्णः पार्श्ववर्त्तिषु गुरुषु दृष्ट्वो पदेशि शुष्ममभिनयं
लोचनहस्तपादविन्यासादिमतिलंघयितुमन्यथा कर्तुं शीलं यासां ताः नर्तकी रलज्जयत् स लज्जा प्रकारयतो महर्त्वात्त्यभिनया तिलंघनेन गुरवो सा
स्वरूपासक्तमनसा विदन्तीति नर्तकीनां लज्जावभूवेतत्यर्थः २४ चार्विति चारुणो रम्यस्यान्तस्य विरमे ऽवसाने तन्मुखं तासां नर्तकीनां स्थानं
पिवन्नुचुंवन्नग्रेम्भाद्दत्तः स्वेदनिवारणार्थं वदनस्य मुखस्यानिलो वातो येन तादृशः स राजा ऽमरालकेश्वरौ पुरंदरकुवेरावन्वजीयद्
चकार कीदृशं मुखं परिश्रमात् खेदेन भिन्नः आर्द्रः तिलको यस्य तत् २५ तस्येति नवेषु स्वर्वमनुप्रमुक्तेषु कामेष्वभिलाषालीयेषु वक्ता
षु इंद्रियार्थेषु संगिनः आसक्तिमतस्तस्य नृपस्य समागमाः संबंधाः वल्लभाभिः स्त्रीभिरूपस्य तस्य समागतस्यासम्यद्दृङ्मुक्ताः सामिभुक्ता स्ताद्द
शा विषयायेषां ते तथा एतेन विमुक्तं यद्यस्मै समस्ता अस्माभिः संयोगप्रकाराः प्रदर्श्यतो तदानव्यतिलंघिणीयवस्ताशक्तिमत्वादस्मात्
रित्वयान्या मयमभिगमिष्यतीति विचार्य रमणीभिर्निःशेषक्लिशेषकलिताः संभोगप्रकारा न दर्शिताः इति भावः २६ अंगुलीभिरिति स राजा प्रणयिनीवंद्ये
माः एतद्वचेयन्नवापप्राप एतत् किमाह अंगुलीकिशलयाग्रे स्तर्जनं भ्रूविभंगेन कुटिलं वक्रं वीक्षितमवलोकनं च मेखलाभिः कांचीकलापेना सकृद्बंधनं
धनं च कोपः गोत्रस्खलनना दिना सापराधमेनं कापि तर्जयति कापि नंसेर्ष्यमीक्षते कापि मेखलया बध्नाति तथा विधो वल्लभा अनुबभूवेति भावः वंचयन्प्रति
हरन्निति काश्चित् अत एव गूढविबंधाः प्रलमत्तद्दत्यादिना मातनेपदाभावाद् दोषः २७ तेनेति असांघ्रापायां सुप्ताः सुरतस्य पारस्य व्यवहारद्दतिप्राप्तां सुरतवा
रराित्रिषु स्त्रियाः दृष्टतः पश्चान्निपदुमागुप्तत यास्थितेन तेनन्नपेण विप्रलंभं वियोगं शंकिनः इति ता दृशस्य प्रिय जनस्य वल्लभा लोकस्य दूते निवेदितं दूत्यग्रे कापि
तं कातरं भो धे ध्याजिते वतस्यैवं रूपं वचः भृश्र वेश्मातं २९ लोल्पमिति लोलं प्रधतमेतस्माप्प गृहलीनां रात्रीनां परिग्रहात्ती कोरोदसुलभासु प्रणय कल
हकुपितविन दुर्लभासु नर्तकीषु तद्दपुः कथं चित् महता कष्टेनालिखन् चित्रे लिखन् स राजा अंगुलीस्विन्नत्वरलनस्तन्नानश्चावर्त्तिः परिकायस्य स तादृशो ऽत्र

र्त्तितस्माभूत् तच्च ... स्मरणमात्रप्रोद्भूतमन्मथत्वात् सात्त्विकभावोद्गमयात्त्वं कथं विदितुमुत्कि: १८ त्रेमेति द्रव्य:पद्दमहिष्य: उज्झिता: परित्यक्ता:
नर्त्तकीलिखनेन जनिता रुचिर्यासां ताश्च द्वे ... कीय: परिवत्स भद्रति स्नेहेन गर्विता सा ... हं कारा विपक्षा: शत्रव: सपत्न्यस्ताभिर्मत्सरान्मा
त्सर्यादापतितादीर्घकालवर्त्तिनो राज्ञो मदनान्त्कं दर्पात् उत्सवस्य विधिच्छलेन कपटेन तं महीदितेराजानं कृतार्थतां संभोगसौख्यानि नुप्राप
यंति स्म १९ प्रातरिति कृतान्संपादिता खंडनव्यथा अन्योन्यासंगचिह्नज्ञानोत्पन्नपीडा यासां ता: प्रणयिनी वल्लभा: प्रातरेत्यागत्वा परिभोगो
रदनखंडनं नखैस्ताडितं नखाभावे विनादर्शनेन करणभूतेन प्रांजलिर्भूत्वा प्रसादयत् ग्रहणेन आलिंगनादावविघ्नं घर: स्तब्ध: सन् स्त्रियो
ऽनुनोत्थापयति स्म तथाचोक्तं भ — भट्टेकोपयत्नपुरपि गुह्यतेभिन्नवद्दोष: त्रसतादिति २० स्वप्नेति अत्र वदंत्यो ऽभाषमाणा एवांग
ना: स्त्रियो स्वयं कीर्त्तित: कथितो विपक्ष: सपत्नी येन तमग्निवर्णप्रच्छद: पृथ्व्याया उपरितनेव स्त्रेत संपाते समीपेग... लिता: पति
तोऽत्रस्त्रा विंदवो येषु क्रोधाद्भिन्ना विदलितानि वलयानि येषु तथाभूतै: विवर्त्तनै: शयनीयोपरि विलुंठनै: प्र... त्यमेस्तु भर्त्स
यंति स्म प्रत्युपालंभनं च कुर्वन्त्यनेये विवर्त्तने भर्त्सयंति स्म नतुवाक्यै: अत्यद्भुतम वदंत्यस्य प्रसपत्नी नामभिधानग्रहणं गनानामति
पीडाकरित्वात् कंकणभंगरुदितैर्भर्त्सीनमित्यर्थ: २१ कोपेति दूत्या कृतं मार्गदर्शीनं यस्मै स राजा लक्ष्यं ... रचितं पुष्पशयनं ये ... लतानृहोने
त्यक्ता पापवरोधजना रंत:पुरस्त्रीलोको यत्र ... तायोसौ वपथु: कंप: स उत्तरत्त यस्मिं तादृश परिजनो ... तरं भत्स... सुरतव मन्वभ
त् २२ नामेति संभोगक्षणे गोत्रं सपत्न्यभिधानं तत्र ... स्खलितं ... ग्रेगनाम्त्रिय... सूचु: इतिकिं तव वल्लभजनस्य अभीष्टलोकस्य नामा
प्राप्य म ... यात स्य व वल्लभस्य भाग्यमपि को दत्ते मिलषते यथा देवा ... ज्ञातनाम ... तथा भाग्यं भवेदिति मम मनो लोलुपमिति वतरवेद
धीरा एतास्तां नायका: २३ तूर्णेति शयनं शय्या विलासिन: शृंगारिणस्तस्य विभ्रमरतानि मर्कट ... प्रभृतीनि अपाहृणेनसकदर्यां चकार वि

लालितत्वेनानासुरतलोलुपत्वे हेतुः नानारतमेवाह कीदृशं शयनं अवाङ्मुखत्वेन विगलितालकसंपर्कपटवासकुंकुमचूर्णैर्दिनाच्च तु पिंगलवर्णं
अनेन ध्यानतात्पर्यतमुक्तं तल्लक्षणं च कामतंत्रे यथा ध्यानंतरतमिदं यदि प्रिया स्याद् अधोमुखचतुःपदाकृतिः त्वा कटिं समधिरुह्य वल्लभः
स्याद् वृषादिसंस्थिता खरतितथाल्लुलिताभिः कृशाङ्क्यष्टाभिः स्त्रीभिर्मालाभिराकीर्णाभिरनेन मर्कटतरं यथेदं कद्वयमालिङ्ग्याविततदेक
चरणोत्सम्मुत्थिते जायते च हरिविक्रमाह्वयं छिन्नाभिखलायस्मिन्नितरनेन करिरतं तच्च यथा भूगतस्तनभुजास्य मस्तकामुन्नतः स्वयमधो
मुखी स्त्रियं कामति त्वकरघृष्टा महनो वल्लभः करिवदेभमुच्यते आलक्तकेन लाक्षारसेनांकितां चिह्नामिति धेनुकरतं यस्या न्यस्तहस्
स्तयुगले निजेपदद्वयो धिदेनिकटस्थवल्लवलाश्रयतो यदि मनोरधोमुखं धेनुकं वृषवर्त्म दुदनात् प्रियइति कीदृशस्य तस्य स्थिताय तस्या स
यास्थितस्यैनां प्रविष्टस्येति चतुर्विधसुरतसंभवात् २४ सइति सराजा स्त्र्य मात्मना योषितां स्त्रीणां चरणयोरागं लाक्षारसमादधे न्यः
धात् स्लथान्सुकानि वस्त्राणि यत्र तैर्नितंबिभिर्मेखलागुणानां स्त्रसणं पदैः स्थानैः लोभमाने आलक्तमाणे नेत्रेयस्य सोऽतएव लाक्
षारसे दत्तेपतद्याः समाहितः समाधानवान्सावधनो वान बभूव २५ चुंबन इति तस्यान्नृपस्य बध्वा मुग्धया रतं सर्वतो विधिता वल्लभस्ये
च्छा यत्र तथा भूतमपि मन्मथसंधनमुद्दीपनमभूत् कीदृशं चुंबने क्रियमाणे विशेषेण परिवर्त्तितः पराङ्मुखो कृतो धरो यत्र ततद्रसनाः
याः कांच्याः विघट्टने शिथिलीकरणे हस्ते स्तगणेह्दत्तरोधि मुग्धं नस्तलस्तद्भटः सकंपाचुंबनेवक्त्रां हरेत्तेषाव गृहीतापरा हृतापि
रतले गात्रेरत्ति ह्यनिकं पिमितिति २६ दर्पणइति नर्मसूर्वं परिहासपूर्वं वधूनामनुपृष्टं पश्चाद्भागे स्थितः सराजा दर्पणे लेखादर्शे वपु
रिभागे चिह्नं न खद्दतादिकं दर्शितारवलोकयमानाः वधूः स्मितेन मनोज्ञया छायया निजप्रतिबिंबेन ह्रीनिमीलितमुखीः लज्जा
संकोचितनेत्रा श्रकार आदर्शी पृष्टस्य भर्तुः प्रतिबिंबं समीक्ष्य सलज्जो अभूवन्नितरर्थः २७ कांचीति शयनान्तःच्छय्याया उत्थितं राजानं

प्रियाः स्त्रियो निशान्तये रजन्यवसाने विसर्गचुंबनं संवादनार्थं चुंबनं प्रार्थयितिप्रार्थयामासुः कीदृशं भर्तुः कंठेसक्तं लग्नं मृदुबाहुबंधनं यत्र तन्मतः शरीर
वान् तथा भर्तुरेव [illegible] पादयोर्न्यस्तं पादतलं यत्र तादृशं इति प्रौढजातिः निशावसाने यदि चुंबनादि प्रार्थ्य याव न्न दत्तो स्यादास इति गोन छा
यः नयनगलकर्णदंतवासो मुखीतः स्तनयुगललाटं चुंबनस्थानमाहुः इति जघननाभीमूलकक्षास्तु चुंबनं व्यतिकरसुखमुच्चैर्दृश
सालेपनलीढा इतिरहस्ये २८ प्रेक्षेति सयुवा शक्रमतिक्रम्य शोभमाने शक्रशोभिनमात्मनो राजवेश्मदर्पणतलस्थं प्रतिबिंबितं प्रेक्ष्य तं
यानपि प्रियेन प्रीतो यथा व्यक्तानिलक्ष्माणि नखदंतादि चिह्नानि यत्र तत्परिभोगे मंडनं वा तदपि प्रिये प्रीय [illegible] पीडा विनिकृत्तिरित्युटू
२९ मित्रेति अयमेव मम मित्रस्य सहस्य कार्यमास्त इति च्छ पदस्य व्याजीकृतस्य पार्श्वतः समीपात् स्थितेन चलितं अनवस्थितं च चलं तं राजानं प्रियं वल्लभा इति
कचग्रहैः केशग्रहणैः रुरुधुः [illegible] इति किं रेश गूढविप्रियकारितो पलायनच्छलाम्बं जमानत्वे न शीघ्रं यया छ इति ज्ञातवा स्मरस्य सर्वो योजयत्य यथा वा
संज्ञायाभाषते मित्रकार्यं वा प्यपिधि दिसानो याती विवात्स्यायनः मागोर्मद्दीयस्त्वाह कृतुस्नानाभिगमे पित्रकार्यं तथा यदि [illegible] त्रिबेतेषु प्रियतमः हंतबोवा
रगम्यपेति वि [illegible] त्येति विदोलदोवायं वियगूढः विप्रियकृच्छ्रवइति दशरूपके ३० तल्पेति निर्दयः कृपारहितो यः आयतेनालसा [illegible] योवि
तः स्त्रियः कंठसूत्रमालिंगनविशेषमपदिश्य प्रकटीकृतपीवराभ्यां स्तनाभ्यां भिन्नकुंकुमं यस्य तद्धृदयं विशालं तस्य स्तनाभिघातं निजं परोढा प्रेरक (वे
म पर्यशनके विदग्धस्त्वं कंठसूत्रं प्रवदंति संतः ३१ स्तनेति तुरतिरहस्याय प्राउत्तरसिकमिथुनहृदयैरविशती वरंगो स्तनयुगमुपघाते यः स्तनालिंग
नं तत् कंठसूत्रहारादिनिराकृत्येति कश्चित् पुरुषायतं विधाय सखेदास्तत्रास्वास्तु रितान्याः ३२ समाजेति निभियो यां तत्संगमायगृहचारिणं गृहं
यातं चारसूपयादूत्या कथितं निवेदितं तमोचत्तमावरणं यस्य स तं राजानं पुरोगतः अग्रगामी रोधं कृतवंतो गना मो काम कनो स्मान् अतः परं न
वंचयिष्यसीति वकसुगृहे निम्नं नं तुताडयामासुः ततो वृत्तमिति ओजः सहोभस्त्ससमस्तनीया यानुकूप्रसंगात् ३३ योषितामिति उडुपते रिंदो

४

खण्डिताग्रधरा यासां तथाभूता वेणुनावंशेनाविजिताः हृतो द्वेगाः नखपादैर्नखक्षतैरंकिता २ (पादैः)

३

रात्रिं वारस्त्रीनामिव यो पिताः स्त्रीणां स्पर्शनिवृत्तिसौख्यमवाप्नुवान् लतमानो सोराजा रात्रौ जागरो जागरणं तत्परो दिवा सेते दिवा शयीत यश्च कुमुदाकरस्यो प
मानं ज्वालाभासीनपुं स्पर्द्धिः स्त्रीलिङ्गेपि रात्रिजागर इत्येतत्तत्सायोगेक्षितीयासमासः ३४ वेणुनेति दशनैर्दन्तैः पीडितौ रूक्षौ यासां तां पदनखांकितो
शिवक्षतौ वीणया विलुभयेन च वे जिता शिल्पवेणुवीणावादनरूपं कुर्वतीति शिल्पिकार्यं स्त्रियो विजिह्य चक्रेनजनेयासां ता दृश्या भूत्वातं न पंथलोक
यन्नइष्टाः अधरोष्ठसंसर्गे विना वेणु [illegible] वीणावादनं न घटते तेवामुनारदनन खक्षता अतस्तद्वादने संप्राप्तदुःखा शिल्पकार्यमुखविलोचनैरेणाम
पश्यत इतिभावः शिल्पकार्ये इतिकर्मणि एण्डिलुणीसोद्दिनौडी ३५ अंगेति मिथो रहस्यंगा अर्थे करविन्यासादिसविभ्रमन्तदाश्रयं स्वेदरोमांचादि च
वनाम्ह्येयं गतादीत्येवं लक्षणं ततं स्त्री कुचवधी यमिनीय पुनर्मित्राणां सन्निधौ पार्श्वे नर्तकीमुखे दर्शयन्न सो गिनवर्णैः प्रयोगनिपुणैः कुशलैः प्र
योरुमिभिर्रताचार्यैः सहसंजहर्षस्यामूर्चक्रे सामान्यामयो नाममेयो वागंगसंगत्वावान् इतिभरतः न तस्य गात्रविक्षेपात्मकत्वादंगाश्रयतापि
यत्नेत्यत्यक्त [illegible] स्तं सत्वंशेयां भा
वरसालकं आलोकितविलोकिते उल्लोकिते वा गुद्देत्तेतपाचे वालोकितं अष्टौ दर्शनिया मेदान्न तस्य गधस माश्रयाह त्युक्तत्वा सात्यकान्या
लोकितानो त्यन्ये अतः परं षड्भिः संभोगवर्णनं ३६ अंसेति प्रावृषि वर्षर्तौ अमदान्न लक्ष्मयावर्हिणो मयूरायत्र ताट्टशो बुक्षत्रिमाद्रिपुक्रीडापर्व
ते युतस्य राज्ञो विहारविभ्रमो विलासो भूतकीदृशस्यांसयोः स्कंधयोर्लंबिन्याः प्रलंबमानाः कुटजवृक्षाणां अर्जुनवृक्षाणां बकुलानां स्रजो यस्य त
स्य तथा नीपरजसा कदंबपरागेणांगरागयुक्तस्पर्ककेलिः ककुभोर्जुनः कुटजो गिरिमल्लिके त्यभिधानचिंतामणिः ३७ विग्रहादिति सराजा वि
ग्रहात्क्षणय कलहात् शयनेशय्यायां पराङ्मुखी खलाः स्त्रीरतुनेतुं नतत्वरे यांगो वभूव किंतु घनशब्दान्मेघगर्जितो द्विलवाः सभयाविवृत्तस
मुखीभूय भुजांतरं वक्षस्थले विशंता स्त्रिय आचकांक्ष दोमिलषा तथा च रुद्रधरः देशाकालहरात्कायः पायः सर्वो रयोषितं जायते सुधस्ताच्चोपि

हृद्ये साध्वसरागत इति ३८ शरदमाह ललितांगनासखः मनोहरमेखलीयुक्तः सवितानं सोधोच्चैः हर्म्यं भजतीति भाक्त् स राजा कार्त्तिकसंवं
धिनीपुरात्रिषु सुरतस्य क्रमं श्रमम् अपहरन्तीति ताहृशी मेघान्मुक्तो मत्त एव विशदा अमलां चंद्रिकां ज्योत्स्ना मन्वर्युक्तः ३९ सैकतमिति सरणा
श्रोणिविंबं अपि सैकतं पुलिनं विहरवतीः प्रकटयंतीः शारदं नदी सौधजालविवरैर्विनोदैर्लोकात् कीदृशी हंसा एव मेखला यस्याः सा तां स्वस्य
प्रियाणां स्त्रीणां विलसितमनुकरोतीति ताहृशी स्त्रियोपि श्रोणिविंबादिकं वल्लभाय प्रकटयंति ४० हेमंतमाह स्वादिते ति शिशिरराश्रय(
स्तस्य नृपस्य सुरतसाक्षितां युयुर्गताः कीदृश्यो निवातावातरहिता कुड्यो मध्यभागये पां ते गर्भविश्रमसुन्दरेषु गर्भगृहेषु अर्पिताः स्थापिताः(
स्तिमितानि अचलादीपा एव दृष्टयो यासां ताः तथा सर्वाणि यानि सुरतांतरादीनि उष्णवायुतादीनि तत्रा तिदीर्घभावा स्वित्प्रसं[illegible] तापाद्यभावा स्ता
मा योग्याः अन्योपि यः साक्षी स्यात् सोप्येताहृश एव भवति ४२ वसंतमाह दक्षिणेन पवनेन मलयशैलानिलेन संभृतं संचितं सपल्लवं चूतकुसु
ममाघ्राय पुष्पं प्रेक्ष्य विलोक्य अंगनाः स्त्रियस्तं भूपमन्वनैषुरनुनयंतिस्म कीदृश्यः अवकीर्णस्त्यक्तः विग्रहो याभिस्ताः कीदृशं दुःसहः सोढुमशक्यो
वियोगो यस्य तं ४२ काश्चिदिति सनृपः काश्चित्ताः प्रिया निजमंकमुत्संगमारोप्य परिजनैः सेवकैरपि विधयति हित चलनया दोलया प्रेंखयन् अ।
दोलयन् भयच्छलात् भीतिव्याजेन ताभिर्मुक्तार्भुजयेस्मिन्कर्मणि तत्तथाभूतं निविडंगाढं बाहुभिः कंठबंधनमालिंगनं प्राप ४४ ग्रीष्ममाह त
मिति प्रियाः राज्ञो ग्रीष्मवेषविधिभिस्तपर्तुयोग्यवेषविधानैस्तमग्निवर्णं धिवा विरेभजंतिस्म कीदृश्योः पयोधरयोः स्तनयोर्निषिक्तं निहि
तं चंदनं यत्र तैः तथा मौक्तिकैः ग्रंथितानि चारूणि रम्याणि विभूषणानि यत्र तैः श्रोणिषु नितंबेषु लंबिन्यो रत्नमेखलाः कांच्यो यत्र तैः त
पत्तैः प्रोतस्य गर्वेषितत्वात् ४५ यदिति यतो हेतो स राजा भग्नः सह कारप्यत्र तत्तथा रक्तपाटलेन पाटलापुष्पेण समं गतं मिलितं आसवं मधुप

यो ऽपि व तिष्ठन् तेन कारणेन मध्ये वसंतस्य निर्गमेण ... शः स्त्रीणां श्रितत्वयोनिः कंदर्पस्तस्याग्निर्वल्लभस्य पुनर्नवो भवत् ४६ एवमिति एवमनेन प्रका-
रेण इंद्रियसुखानि निर्विशन्ननुभवन् अन्येभ्यः कार्येभ्यो राजकृत्येभ्यो विमुखः काममोहितः एकतानः स पार्थिवो आत्मनः लक्षणेन गुप्त्यादि विहीनं नि-
वेदितान् सहनत्वात् यरतिवाहितवान् ४७ तमिति अन्ये पार्थिवा अपरे राजानः प्रमत्तमपि प्रमादयुक्तं स्त्रीसक्तमिति यावत् तादृशमपि तं न
पंप्रभावतः प्रतापात् आक्रमितुं न शेकुः न समर्थाः किंतु सुरते योऽसौ रागो ऽभिलाषस्तदुत्पन्न आमयो रोगस्तं तं राजानमभिबिलोत् स्त्रीणां चकारदक्ष-
स्य प्रजापतेः शापः शश्रं इंदुमिव ४८ दृष्टदोषमिति भिषजां वैद्यानामनादृत्य तमस्वाधीनः स राजा दृष्टदोषमुत्पन्नक्षयरोगमपि तं प्रसंगवस्तु स्त्री मद्यादि ना
त्यजत् तत्र हेतुमाह स्वयतः स्वादु ... भिः स्वादुयुक्तैर्विषयैः स्त्रूपादिभिर्हृतः समाक्रांतः इंद्रियगणस्तेतो विषयेभ्यो दुःखं निवार्यते निवारणीयस्सात्तत्त
धस्वादुरिंद्रियगणः क्लेशेन विषयान्निवर्त्तते इत्यर्थः ४९ तस्येति यक्ष्मणा क्षयरोगेण ग्रहस्य निःश्रीणता तस्य राज्ञः कामयानस्य कामयमानस्य ... सम
वस्थया दशया तुल्यं सादृश्यं सपदि शीघ्रमाययौ प्राप कीदृशा पांडुवदनं मुखं यत्राल्पभूषणं यत्र सासावलंबेयष्ट्यादि पुक्तं गमनं यस्यां मंदस्वनो यत्र
सा तुल्ययोगेन तीयाकामयानेति सुगमी व स्त्रीत्वं ... कायान्तं प्रहृत्तिर्यस्याः सा ५० व्योमेति क्षयेन क्षयरोगेण आतुरे राज्ञि सति पश्चिमकलावशिष्ट-
कृत इंदुरस्यास्तीति तादृशं व्योम आकाशमिव पंकशेषं कर्दमावशिष्टं घर्मकालपल्वलमिव वामनार्चिः स्वल्पदीप्तिर्दीपमिव तत्कुलमभूत् ५१ गहे-
ति एषु दिवसेषु पार्थिवो राजा पुत्रजन्मने संतानार्थं ... कर्म पुत्रेष्टिं साधयति कुरुते इत्युक्त्वा स्पर्शितस्तत्स्त्रीतजनो ऽप्रकटितं बाधयो मंत्रिणो ऽप्र-
मात्याः मतङ्गतत्वं शंकिनीः पापचिंतयंतीः प्रजाः लोकान् ... दृ वृषबदत् ५२ सइति अनेकवनितासखो ऽपि कांतायुक्तो ऽपि सन् ... वर्णीः
पावनी सततं मनवलो कथा दृष्ट्वा वैद्ययत्नपरिभाविनं भिषक्कृतयत्नातिरस्कारिणं क्षयरोगं नात्यगात् न निष्क्रामत् प्रदीपो वायुमिव ५३ त

मिति पश्चिमक्रतुरंते द्विस्त्तविदात इव पुरोधसा संगतामिलिता मंत्रिणा गृहे पवनएव पुरोघनएवरोगशांतिं व्याधिचिकित्सामपदिश्य व्याजीकृ
त्य संभृतेमदीप्तोर्ग्निः खिनिवह्निं गूढं गुप्तमादधुः निचिक्षिपुः अग्निसंस्कारं चक्रुरित्यर्थः ५४ तैरिति कृता विहिता प्रकृतिमुख्याणां सेनापति
कोशाध्यक्षादीनां संगृहो मेलनं यैस्तैर्मंत्रिभिः सम्यगृहं शुभं सत्तु त्ररूपं गर्भलक्षणं यस्याः सा तस्याग्निवर्णस्य सहधर्मचारिणी पत्नी शी
घ्रं नराधिपश्रियं राज्यलक्ष्मीं व्रतपद्धते प्राप राज्येभिषिक्तेत्यर्थः ५५ तस्या इति तथाविधस्य तादृशस्य नरेंद्रस्याग्निवर्णस्य शोकादुत्थस्तस्या
विलोचनजलैरश्रुभिः प्रथमं पूर्वमभितप्तो गर्भः [illegible] कनककुंभमुखोक्षि[illegible] तेन राज्याभिषेकपयसा जलेन निर्वापितः शैत्यं प्रापि
तः कीदृशेन शिशिरेण शीतलेन राज्ञी राज्यस्तानान्वय वियोगक्लेशमत्यजदित्यर्थः ५६ तमिति प्रसवसमयाकांक्षिणीनां प्रजानां भूतमर्थं
ते त्रतगुप्तबीजमुष्टिं दधाना राज्ञी विधिवत्सम्यक्प्रकारेण भर्तुरग्निवर्णस्य राज्यमशिष्यत्पालयामास कैः सार्द्धं स्थविरसचिवैः मौलैः सार्द्धं कथंभूताऽव्या
हताज्ञा नदूरा भूता ज्ञा राज्ञी किंवत् क्षितिरिव यथा क्षितिः [illegible] तगुप्तबीजमुष्टिं दधाति तत्कुत्र [illegible] कीदृशी हिमासिक्तस्य स्वर्णा सन्त
स्थिता ५७॥ इति श्रीमालान्वयसाधुश्री अरडकमल्ल तनूजपंडित खरतरगच्छीयनरवेस सरस्वती वाचनाचार्य श्री चारित्रवर्द्ध
नविरचितायां शिशुहितैषिण्यां राघवीयटीकायां मेकोनविंशतितमः सर्गः संपूर्णोभूत्॥ तत्समाप्ते समाप्तोयं ग्रंथः॥ १॥
[illegible] १८५१ [illegible] वदि १२ [illegible] लिखितं [illegible] गणेशदत्तेन स्वात्मा मा चंद्रिण॥ २ १ १ १ १ १ २
संवद्भूपग्रहा हिचंद्रक मिते पौषेदले सुत्रके विधक्तेन तिथौ रात्री [illegible] तिनी [illegible] जो गोजरः॥ व्याख्या ने रघुवंशके शिशुहिताधारं शुभं सत्सदं बालानां तु सुबोधकस्सकरणोश्रा
ते बिसस्ती तिदां॥